२६७ गिचर्यार्थं परिसर्पतो भिक्षाचर्यायां प्रविष्टो मुनिरिंनवस्त्रांतरायो भवतीति तथा छर्दिरिति मिथ्यात्वराधनात्मनासंयमा
विराधनाख्यांतरायो भवतीति तथा रोधनं रोधनमिति अनवरुद्धोपरिस्खलनमिति केतन राया इत्याज्ञा कायोत्सर्ग   का
गामस्थाबद्धरोधनांतरायस्य दर्शनमूरुधायेन जत्रुः दिवामारिसं जण्ड्वरि दिक्कमंधचेव   काकाद्युपलक्षणार्थो
गृहीतस्तेन काकबकश्येनादयः परिगृह्यंते तेमत्ततः स्थितस्य वा बकाकादयो यद्युपरि विद्युत्सर्गं कुर्वंति तदपि
काकाद्युच्यते मा हर्चयांति काकोनामांतरायः तथा मेध्यमेध्ये प्रविशति तेन पादादिकं यदि लिप्तं तदमेध्यमि
त्युच्यते साहचर्यात् अमेध्यं नामांतरायः तथा छर्दिर्वमनमात्मनो यदि भवति तथा रोधनं यदि कश्चित् करणादिकं
करोति तथा रुधिरमात्मनोन्यस्य वा यदि पश्यति विशोद्भव्यादिकं वयासं तथाश्रुपातो दुःखेनात्मनो यद्य
ऽनिकटानां
न्यस्य गताग्तिपरधामपिसन्निकृष्टानां यद्याक्रंदो भवेत् तथा जान्वधः आमर्शो जान्वधः परामर्शस्तथा जानूपरिव्य
तिक्रमश्च व्रमर्दवोंतरायस्य संबंध इति तथा   णाभिअधोणिग्गमणं पच्चक्खियसेवणाय जंतुवधो कागादि १२५
पिंडहरणं पाणीदो पिंडपडणं च   नाभ्यधो निर्गमनं नाभेरधो मस्तकं कृत्वा यदि निर्गमनं भवेत् तथा प्रत्या
ख्यातस्य सेवनं चांतरायं यदा यस्य वस्तुनः प्रत्याख्यानं कृतं तस्य वस्तुनो यदि भक्षणं स्यात् तथा जंतुवधः आत्मनोऽन्येन वा पुरतो जीव

= नोभनस्य तान नानां र

= महामार्गादि महामारीयुद्धेति इत्यर्थः ४

वधो यदि क्रियते तथा काकादिभिः पिंडहरणं यदि काकादयः पिंडमपहरंति तथा पाणिपात्रात् पिंडपतनं भुंजानस्य
२६८ पाणिपुटाद्यदि पिंडो ग्रासमात्रो वा पतति तथा   पाणीए जंतुवहो मंसादीदंसणे य उवसग्गे य पादंतरम्मि जीवो
संपादो भायणाणं च   पाणिपात्रे जंतुवधो जंतुरागत्य पाणौ भुंजानस्य यदि म्रियते तथा मांसादिदर्शने
मांसमृतपंचेंद्रियशरीरकृत्स्नवमादीनां दर्शने यदि स्यात् तथोपसर्गादिविकाद्युपसर्गः स्यात्तथा पादांतरे पंचेंद्रियजी +यदि
दातो
वो यदि गच्छेत् तथा संपातो भाजनस्य परिवेषिकहस्ताद्भाजने यदि पतेत् तथा   उच्चारं पस्सवणं अभोजगिहपवे
सणं तहा पडणं। उववेसणं सदंसं भूमीसंफासणिट्ठुवणं   उच्चारश्चात्मनो यदुदरमलस्योत्सर्गः स्यात् तथात्मनः दुष्टनं दंशः
प्रस्रवणं मूत्रादिकं यदि स्यात्तथा पर्यटतो राजगृहप्रवेशो यदि भवेत् चंडालादिगृहप्रवेशो यदि स्यात्तथा पतनमात्म कुर्कुरादि
नो भ्रमादिना यदि पतनं भवेत्तथोपवेशनं यद्युपविष्टः स्याद् भवेत्तथा सदंशः सदंशनं श्वादिना यदि भिः ४
दष्टः स्यात् तथा भूमिसंस्पर्शः सिद्धभक्तौ कृतायां हस्तेन भूमिं यदि स्पृशत्तथा निष्ठीवनं स्वेन यदि श्लेष्मादिकं क्षिपत्
या   उदरकिमिणिग्गमणं अदत्तगहणं पहारगामडाहा य पादेण किंचि गहणं करेण वा जं च भूमीए   उद
रात्कृमिनिर्गमनं भवेत्तथा अदत्तग्रहणं अदत्तं यदि स्यात्तथा पादेन यदि किंचित् गृह्णाति तथा करेण वा यदि कि
*किंचिद्भूमौ तथा चदारं आत्मनोन्यस्य वा खड्गादिभिर्यदि प्रहारः स्यात्तथा ग्रामदाहो यदि। ८।

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२७९ विष्टयते तथा केवलाचार्यादिकं विस्तृयते तस्मै इति सर्वज्ञो ज्ञानस्यांतगयोन वतीति संबंधस्तथा पते अस
वक्रमः कारणस्तदा अत्तापराब्साह जीकणलोकउतुवण संजमणिविदणाहंवं पतेस्तुवेक्काः काकाद
वांतरायाः कारणात्तूतो सा जनपरित्यागस्य घातिनां सांन्यैवहस्तु डालादिस्पर्शकिलस्मरण माधम्मिकि
सन्यासपतनप्रधानमरणादयोः ज्ञानपरित्यागदतव लयलोककउपायामं व्यमनिर्वदनार्थं चयदिकिं ति
त्साद्यंतथाप्यादारत्यागः सयमार्थं दाहागत्यागा निर्वदनार्थं चेति पिमस्त्रक्विमुंउपसंहरन्नाह जेणरूप
डसुद्दी उववदिवाजे दिथारिदासमं तवीरसाऊवया निरयणसुद्दिममदिसंव सूत्रकारः फलार्थी प्राह २२९ ं
वारिदेपिंडसुद्धिरूपदिष्टायै शुधःरीतामविता सम्पद्विधाने नतवीरसाकवर्याखिरत्न शुद्धिममशिव
प्रायात जायते पुंसां वीतरागस्य
दर्शनं तद्दर्शनतिरस्कानां सदेज्ञन्मापितिः फलं अथषडावश्यकक्रियेश्वलगुणांतर्गतमधिकारंप्रपं २२७
चेनंविवृण्वन्प्रथमतंतावन्नमस्कारमाह काऊणणमोक्कारं अरहंताणंतहवसिद्धाणं आयरियउवज्झा
पलोगंमियसव्वसाहूणं कृत्वानमस्कारं केषामर्हतां तथैव सिद्धानां आचार्योपाध्यायानां च लोके च सर्वसाध

= कारयिता कारकः २

नां लोकशब्दः प्रत्येकं अभिसंबध्यते कारशब्दोऽयमनेनतनषष्ठीसंतानां तान्यथा उनश्रुत्वार्थो भवति अर्हत्सिद्धाचार्योपा
२८० ध्यायसाधुल्यानां लोकेस्मिन्नमस्कृत्वा आवश्यकनिर्युक्तिं वक्ष्य इति संबंधः सापेक्षत्वात् क्त्वांतप्रयोगस्येति नम
स्कारपूर्वकं प्रयोजनमाह आवासयणिज्जुत्ती वोच्छामिजहाकमंसमासेण आयरियपरंपराए जहा
गदाआणुपुव्वीए आवश्यकनिर्युक्तिं वक्ष्ये यथाक्रमं क्रममनतिलंघ्य परिपाट्या समासेन संक्षेपतः आचा
र्यपरंपरया यथागतानुपूर्व्या आयतक्रमेणागता पूर्वाचार्यप्रवाहेण संक्षेपतः समर्पितनवक्रमेण पूर्वागमक्रमेणा
र्यपरंपरया यथागतानुपूर्व्यायतक्रमेणागताः पूर्वाचार्यप्रवाहेण संक्षेपतः समर्पितनवक्रमेण पूर्वागमक्रमेणा
पति(?)... तावत्पंचनमस्कारनिर्युक्तिमाह रागद्दोसकसाए य इंदियाणि य पंच य परिस
हे उवसग्गे णामयंता णमोरत्था रागः स्नेहो रतिरूपो द्वेषो अप्रीतिररतिरूपः कषायाः क्रोधादयः इंद्रियाणि च
क्षुधादीनि परीषहाः क्षुदादयो द्वाविंशतिः उपसर्गा देवादिकृतसंक्लेशास्तान् रागद्वेषकषायेंद्रियपरीषहो
पसर्गान् स्वतः कृतकृत्यत्वात् सर्वघातिनां नामयन्तो विनाशयन्तो अर्हन्तो नमोऽर्हतां अर्थार्हन्तः कथं निरुक्त्या व्यंतर
नाह अरिहंति णमोक्कारं अरिहा पूजासुरुत्तमा लोए रजहंता अरहंति य अरहंता तेण वुच्चंदे नमस्कार
मर्हंति नमस्कारयोग्याः पूजायाश्चार्हा योग्याः लोके सुराणामुत्तमाः प्रधानाः रजसः ज्ञानदर्शनावरणयोर्हंतारः अ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

= दूरीकर्मी र: २

=२।

रनीदमोतरायस्य च हंतारो यतो हंतारो यस्मात्तस्मादर्हंत इत्युच्यंते येनैतत्कारणेनैवंभूतास्तेनार्हंतः सर्वज्ञाः सर्वलो
कदर्शिनो यथा लोके किमुच्यते ततः किं   अरहंतणमोक्कारं भावेण य जो करेदि पयदमदी सो सव्वदुक्खमोक्खं पावदि
अचिरेण कालेण   इत्थंभूतानामर्हतां नमस्कारं यः करोति भावेन प्रयत्नमतिः स सर्वदुःखमोक्षं प्राप्नोत्य
चिरेण कालेनेति   सिद्धानां निरुक्तिमाह   दीहकालमयं जंतू उसिदो अट्ठकम्मदि सिदधत्ते णिधत्ते य सिद्धत्त
मुवगच्छदि   दीर्घकालमनादिसंसारमयं जंतुर्जीव उषितः स्थितोऽष्टसु कर्मसु ज्ञानावरणादिभिः कर्म
भिः परिवेष्टितोयं जीवः परिणतः स्थितः सितं कर्मबंधे निर्दग्धे परप्रकृतिसंक्रमोदयोदीरणापकर्षोत्कर्षणादिरहिते।
ध्मापणात्सिद्धत्वमुपगच्छति निर्दग्धबंधस्तु सत्ययं जंतुर्यद्यपि दीर्घकालं कर्मसु व्यवस्थितस्तथापि सिद्धो
भवति सम्यग्ज्ञानाद्यनुष्ठानेनेति   तथापायमाह   आवसणी सरीरे इंदियभंडो मणो व आगरित्त धमिदव्व जीव 140
लोहं तु बावीसपरीसहग्गीहिं   आवसनी चुल्ली यत्रांगाराणि क्रियंते शरीरे किंविशिष्टे आवशानीभूते इंदियाण्येव
भाण्डोपस्कारस्तेन संदंशकादीनि गणी हस्तकूटघनादिकं मनस्त्वोकमीचेतोत्रपाध्मायो लोहकारः धमनभस्त्रा निर्मली
कर्तव्योयं जीवलोहं तीव्रवह्निवद्द्वाविंशतिपरीषहाग्निना एवं द्वाविंशतिपरीषहाग्निना कर्मबंधे दग्धे शुद्धीकृतं जागरं स्यात्

जियाणि वा पस्कुरणं तानि परित्यज्य निर्मलीभूतं जीवस्वस्वरूपं दीर्घमनः केवलज्ञानमादि सिद्धत्वमुपगच्छ
तीति सिद्धो भवतीति संबंधः तस्मात्सिद्धत्वयुक्तानां सिद्धानां नमस्कारं भावेन यः करोति प्रयत्नमतिः सर्वदुःखमो
क्षं प्राप्नोत्यचिरेण कालेनेति   आचार्यस्य निरुक्तिमाह   सदा आयारविद्दण्हू सदा आयरियं चरे आयार
मायारवंतो आयरितेण वुच्चदि   सदा सर्वकालमाचारं वेत्तीति सदाचारवित् रात्रादिनं वाचार
स्वपरमार्थसंवदनेयत्नेनंयुक्तोथवा सदाचारः शालनाचारः सम्यग्ज्ञानवांश्च सदा सर्वकालमाचरितवा आ
चरितं गणधरादिभिरनुष्ठितं वा घ्टितं चरतीति वा चरितं चराथवा चगणीयं आमणपयोग्यं दीक्षाकालं शिक्षाकालं
चरि आचारवानिति रूतरूत्वंइत्यर्थः आचारमन्यान्साधूनाचरयन्कारयन् हियस्मात्तस्मात्तेन तस्मादाचार्य इत्यु
च्यते तथा   जम्हा पंचविहायारं आचरंतो पभासदि आयरियाणि देसंतो आयरितेण वुच्चदे
यस्मात्पंचविधमाचारं दर्शनाचारादिपंचप्रकारं आचारं चरन्प्रभासते शोभते आचरितानि स्वानुष्ठानानि
दर्शयन्प्रभासते आचार्यस्तेन कारणेनोच्यत इति एवं विशिष्टस्याचार्यस्य यो नमस्कारं करोति स सर्वदुःखमोक्षं
प्राप्नोत्यचिरेण कालेनेति   उपाध्यायनिरुक्तिमाह   बारसंगं जिणक्खादं सज्झायं कथिदं बुधे उवदेसदि सज्झायं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२२३ तेणुवज्झाओ वुच्चदि ॥ द्वादशांगानि जिनोक्तानि जिनैः प्रतिपादितानि स्वाध्याय इति कथितो बुधैः पंडितैः
स्तत्स्वाध्यायं द्वादशांगचतुर्दशपूर्वरूपं यस्मादुपदिशन्ति प्रतिपादयन्ति तेनोपाध्याय इत्युच्यते तस्योपाध्यायस्य
न ॥ नमस्कारं यः करोति प्रयत्नमतिः स सर्वदुःखमोक्षं प्राप्नोत्यचिरेण कालेनेति ॥ साधूनां निरुक्तिं नमस्कार
फलमाह ॥ णिव्वाणसाधए जोगे सदा जुंजंति साधवो । समा सव्वेसु भूदेसु तम्हा ते सव्वसाधवा ॥ यस्मान्नि
र्वाण" साधकान्योगान्मूलगुणादितपोनुष्ठानानि सदा सर्वकालं रात्रिदिवं युंजंति तस्मात्तान्यो
जयंति साधवः साधुचरितानि यस्मात्सर्वसमाः समत्वं प्राप्ताः सर्वभूतेषु सकलजीवेषु तस्मात्कारणात्ते सर्वसाधव
इत्युच्यंते तेषां सर्वसाधूनां नमस्कारं भावेन यः करोति प्रयत्नमतिः स सर्वदुःखमोक्षं करोत्यचिरेण कालेनेति ॥ पं
चनमस्कारमुपसंहरन्नाह ॥ एवं गुणजुत्ताणं पंचगुरूणं विसुद्धकरणेहिं । जो कुणदि णमोक्कारं सो पावदि णि
व्वुदिं सिग्घं ॥ एवं गुणयुक्तानां पंचगुरूणां पंचपरमेष्ठिनां शुद्धमनोवाक्कायैर्यः करोति नमस्कारं स प्रा १४१
प्नोति निर्वृतिं सिद्धिसुखं शीघ्रं द्रव्यार्थिकपर्यायार्थिकयोर्नयोर्यथासंभवं दार्थश्चावदिति किमर्थं पंच
नमस्कारः क्रियत इति चेदित्याह ॥ एसो पंचणमोक्कारो सव्वपावपणासणो । मंगलेसु य सव्वेसु पढमं हवदि मंग

लं ॥ एषः पंचनमस्कारः क्रियत इति चेदित्याह सर्वपापप्रणाशकः सर्वविघ्नविनाशकः मलं पापं गालयंति विना
२२४ शयंति मंगं सुखं लांत्याददतीति वा मंगलानीति तेषु मंगलेषु द्रव्यमंगलेषु च सर्वेषु प्रथमं भवति मंगलं यस्मात्तस्मा
त्सर्वशास्त्रादौ मंगलं क्रियत इति ॥ पंचनमस्कारनिरुक्तिमाख्यायावश्यकनिर्युक्तेर्निरुक्तिमाह ॥ ण वसो
अवसो अवसस्स कम्म मावस्सयं ति बोधव्वा । जुत्ति त्ति उवायत्ति य णिरवयवा होदि णिज्जुत्ती ॥ न वश्यः पापादे
रवश्यो यदिंद्रियकषायोपकषायरागद्वेषादिभिरनात्मीकृतस्तस्यावश्यकस्य यत्कर्मानुष्ठानं तदावश्यकमिति
बोद्धव्यं ज्ञातव्यं युक्तिरिति उपाय इति चैकार्थः निरवयवा संपूर्णाखंडिता भवति निर्युक्तिः आवश्यकानां निर्यु
क्तिरावश्यकनिर्युक्तिरावश्यकसंपूर्णोपायो ह्यहोरात्रमध्ये साधूनां यदाचरणं तस्यावबोधकं पृथक् पृथक्स्वरूप
णं स्फोतिर्जयति भगवान्नित्यादि प्रतिपादकं यत्पूर्वापराविरुद्धं शास्त्रं न्याय आवश्यकनिर्युक्तिरित्युच्यते ॥ सा च ष
ड्प्रकारा भवति तस्याः षड्भेदान् प्रतिपादयन्नाह ॥ सामाइय चउवीसत्थय वंदणयं पडिक्कमणं पच्चक्खाणं च तहा
काउस्सग्गो हवदि छट्ठो ॥ समः सर्वेषां समानो योऽयः समयः उपवास मायस्तस्मिन्भवं तद्भवप्रयोजनं गुणं पतनदी
व्यतीति वा सामायिकं समये भवं वा सामायिकं चतुर्विंशतिस्तवः चतुर्विंशतितीर्थकराणां स्तवः स्तुतिर्वंदना ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२८५ सामान्यरूपेण स्तुतिर्जयति भगवानित्यादि पंचगुरुभक्तिपर्यंता पंचपरमेष्ठिविषयनमस्कारकरणं वा शुद्धौ वेनं
प्रतिक्रमणं व्यतिक्रांतदोषनिर्हरणं व्रताद्युच्चारणं च प्रत्याख्यानं अनागतकालविषयवस्तुपरित्यागश्च तथा का-
योत्सर्गो निवृत्तिः षट् ॥ सामायिकावश्यकनिर्युक्तिः चतुर्विंशतिस्तवावश्यकनिर्युक्तिः वंदनावश्यकनिर्युक्तिः प्र-
तिक्रमणावश्यकनिर्युक्तिः प्रत्याख्यानावश्यकनिर्युक्तिः कायोत्सर्गावश्यकनिर्युक्तिरिति तत्र सामायिकना-
मावश्यकनिर्युक्तिं वक्तुकामः प्राह ॥ सामाइयणिज्जुत्ती वोच्छामि जहाकमं समासेण । आयरियपरंपराए
जहागदं आणुपुव्वीए ॥ सामायिकनिर्युक्तिं सामायिकनिरवयवोपायं वक्ष्ये यथाक्रमं समासेन आचार्यपरंपरया
यथागतमानुपूर्व्या अधिकारक्रमेण पूर्वं यथाक्रमं सामायिककथनं विशेषणं पाश्चात्यानुसमवीअदणां यथाग-
तविशेषणमिति कृत्वा न पुनरुक्तदोषः ॥ सामायिकनिर्युक्तिमपि षट्प्रकारमाह ॥ णामट्ठवणा दव्वे खेत्ते काले
तहेव भावे य । सामाइयम्हि एसो णिक्खेओ छव्विहो णेओ ॥ अथवा निक्षेपविरहितं शास्त्रं व्याख्यायमानं वक्तुः श्रो- १५२
तुश्चोत्पथोत्थानं कुर्यादिति सामायिकनिर्युक्तेर्निक्षेपो वर्ण्यते नामसामायिकनिर्युक्तिः स्थापनासामायिकनि-
र्युक्तिर्द्रव्यसामायिकनिर्युक्तिः क्षेत्रसामायिकनिर्युक्तिः कालसामायिकनिर्युक्तिर्भावसामायिकनिर्युक्तिः ना-

मस्थापनाद्रव्यक्षेत्रकालभावभेदेन सामायिकस्य निक्षेप उपायः षट्प्रकारो भवति ज्ञातव्यः ॥ शुभनामान्यशुभना-
२८६ मानि च श्रुत्वा रागद्वेषादिवर्जनं नामसामायिकं नाम काश्चन स्थापनाः सुस्थिताः सुप्रमाणाः सर्वावयवसंपूर्णाः
सद्भावरूपा मनोह्लादकारिण्यः काश्चन पुनः स्थापना दुःस्थिताः प्रमाणरहिताः सर्वावयवैरसंपूर्णाः सद्भावरहि-
ताः तासु परि रागद्वेषयोरभावः स्थापनासामायिकं नाम सुवर्णरजतमुक्ताफलमाणिक्यादिमृत्तिकाकाष्ठलोष्ट
कंटकादिषु समदर्शनं रागद्वेषयोरभावो द्रव्यसामायिकं नाम ॥ कानिचित्क्षेत्राणि रम्याणि आरामनगरनदी
कूपवापीतडागजनपदोपचितानि कानिचित्क्षेत्राणि रूक्षकंटकविषमविरसास्थिपाषाणसहितानि जीर्णा-
टवीशुष्कनदीमरुसिकतापुंजादिबाहुल्यानि तेषु परि रागद्वेषयोरभावः क्षेत्रसामायिकं नाम प्रावृड्वर्षा हेमंत
शिशिरवसंतनिदाघाः षड् ऋतवो रात्रिदिवसशुक्लपक्षकृष्णपक्षाः कालस्तेषु परि रागद्वेषवर्जनं कालसामायिकं
नाम सर्वजीवेषु परि मैत्रीभावो अशुभपरिणामवर्जनं भावसामायिकं नाम ॥ अथवा जातिद्रव्यगुणक्रियानिरपेक्षं सं-
ज्ञाकरणं सामायिकशब्दमात्रं नामसामायिकं नाम सामायिकावश्यकेन परिणतस्याकृतिमत्यनाकृतिमति
च वस्तुनि गुणारोपणं स्थापनासामायिकं नाम द्रव्यसामायिकं द्विविधं आगमद्रव्यसामायिकं नोआगमद्रव्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२८ सामायिकं वर्णितं सामायिकवर्णनप्राभृतज्ञायक उपयुक्तः आगमद्रव्यसामायिकं नाम नोआगमद्रव्यसामायि-
कं त्रिविधं सामायिकवर्णनप्राभृतज्ञायकशरीरं सामायिकप्राभृतभाविज्ञायकजीवस्तद्व्यतिरिक्तं चेति।
ज्ञायकशरीरमिति त्रिविधं भूतवर्तमानभविष्यद्भेदेन भूतं च त्रिविधं च्युतच्यावितत्यक्तभेदेन सामायिकपरि-
णतजीवाधिष्ठितक्षेत्रं क्षेत्रसामायिकं नाम यस्मिन्काले सामायिकं करोति स कालः पूर्वाह्णादिभेदभिन्नः का-
लसामायिकं भावसामायिकं द्विविधं आगमभावसामायिकं नोआगमभावसा-
मायिकं चेति सामायिकवर्णनप्राभृतज्ञायक उपयुक्तो जीवः आगमभावसामायिकं नाम सामायिकपरिणत-
परिणामः नोआगमभावसामायिकं नाम तयोर्मध्ये आगमभावसामायिकेन नोआगमभावसामायिकेन
वा प्रयोजनमिति निरुक्तिपूर्वकं भावसामायिकं प्रतिपादयन्नाह। सम्मत्तणाणसंजम तवेहिं जं तं पसत्थसम-
गमणं समयं तु तं तु भणिदं तमेव सामाइयं जाण ॥ सम्यक्त्वज्ञानसंयमतपोभिर्यत्तत् प्रशस्तं समागमनं प्रा- १४३
प्तिः समयः स्वतः जीवस्य यत्समयत्वं समयस्य एव तत्समयमेव सामायिकं जानीहि। तथायं— जिदउवसग्ग-
परीसह उवजुत्तो भावणासु समिदीसु। जमणियमउज्जुदमदी सामाइयपरिणदो जीवो ॥ जिताः सोढा उप-

---

सर्गाः परीषहाश्च येन स जितोपसर्गपरीषहः समितिषु भावनासु चोपयुक्तः आयं यमनियमोद्यतमतिश्च यः सामायि-
२९ कपरिणतो जीवः इति तथा— जं च समो अप्पाणं परं य माइय सव्वमहिलासु। अप्पियपियमाणादिसु तो सम-
णो तं च सामइयं ॥ यस्मात्सम्भावः रागद्वेषरहितः आत्मनि परे च यस्माच्च मातरि सर्वमहिलासु अप्रियप्रियमा-
नः सर्वयाचितामातृसदृशाः परयुवतयः यस्माच्च प्रियाप्रियेषु समानो यस्माच्च मानापमानादिषु समानस्तस्मात्स
श्रमणस्तत्प्रोक्तं सामायिकं जानीहीति संबंधः तथा— जो जाणइ समवायं दव्वाणं गुणाण पज्जयाणं च। सब्भा-
वं तं सिद्धं सामाइयमुत्तमं जाण ॥ इयं गाथा अस्याः सम्यक्त्वसंयमयोः समागमनं व्याख्यातं ज्ञानेन यावत्पुनर्गाथया ज्ञान-
समागमनं व्याचष्टे यो जानाति समवायं सादृश्यं स्वरूपं वा द्रव्याणां द्रव्यसमवायं क्षेत्रसमवायं कालसमवायं भाव-
समवायं च जानाति तत्र द्रव्यसमवायो नाम धर्माधर्मलोकाकाशैकजीवप्रदेशाः क्षेत्रसमवायो नाम सीमन्तनरक-
मनुष्यक्षेत्रऋजुविमानसिद्धालयाः समाः कालसमवायो नाम समयः समयेन समः आवलिका आवलिकया समः
दिभावसमवायो नाम केवलज्ञानं केवलदर्शनेन समम् इति गुणानुरूपरसगंधस्पर्शज्ञानादयस्तेषां समान-
तां जानाति अथवा औदयिकौपशमिकक्षायोपशमिकपारिणामिकाः गुणास्तेषां समानतां जानाति पर्यायाणां

४८ धर्मद्रव्योऽसंख्यातप्रदेशी अधर्मोऽसंख्यातप्रदेशी लोकाकाशोऽसंख्यातप्रदेशी एकजीवोऽसंख्यात [illegible] ४५००००० [illegible] समा
प्रदेशी आकाशस्तु अनंतप्रदेशी एव ज्ञेयः॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२८९ स्कदमनुष्यतिर्यक्देवतादयस्तेषांसमानतांजानातिद्रव्याधारत्वेनहथक्त्वेनगुणानांसमवायःपर्याया।
णांमुत्पादविनाशध्रौव्यत्वेनपर्यायाणां [illegible] समवायोसावसमवायोगुणत्वेतत्वर्तित्वेनत्रस।
मवायःपर्यायेषुतत्वर्तिकालसमवायोद्रव्यसमवायेतत्वर्ततीतिद्रव्यसमवायंगुणसमवायंपर्यायसमवायं
चयोजानातितेषांसिद्धंसद्भावंचनिष्पन्नंपरमार्थरूपंचयोजानातितंमयतंसामायिकंउत्तमंजानीहि अथवा
द्रव्याणांसमवायंसिद्धगुणपर्यायाणांचसद्भावंयोजानातितंसामायिकंजानीहि अथवासमवायत्वेनिसम
वायद्रव्यगुणपर्यायाणांसमवत्वेनिद्रव्यंगुणविरहितंनास्तिगुणाश्चद्रव्यरहितानसंति पर्यायाश्चद्रव्यगुणर।
हितानसंति एवंनिर्दिष्टसमवायंसद्भावरूपंनसंदिग्धरूपंनकल्पनारूपंनापिविद्यारूपंस्वतःसिद्धंनसमवाय।
द्रव्यबलेनयोजानातितंसामायिकंजानीहीतिसंबंधः सम्यक्त्वचारित्रपूर्वकंसामायिकंमाह रागदोसे।
णिरोहित्ता समदासमकंमदा सुत्तसुयपरिणामोसामाइयमुत्तमंजाण रागद्वेषौनिरुध्यसर्वकर्म्मसुक १४४
र्तव्येषुयासमतासूत्रेषुद्वादशांगचतुर्दशपूर्वेषुयःपरिणामःश्रद्धानंसामायिकमुत्तमंजानीहि तपःपूर्व
कंसामायिकंमाह विरदोसव्वसावज्जे तिगुत्तोपिहिदिंदिउ जीवोसामाइयंणाम संजमठाणमुत्तमं

सर्वसावद्याद्योविरतस्त्रिगुप्तःपिहितेन्द्रियोनिरु द्धरूपादिविषयएवंवृत्तोजीवःसामायिकंसंजमस्थानमुत्तमं
जानीहि जीवसामायिकसंयमयोरभेदादितितदेवप्राह जस्ससंणिहिदोअप्पा संयमणियमतवे तस्ससा
२९० माइयंठादि इदिकेवलिसासणे यस्यसंनिहितःस्थितःआत्मासंयमतपसिचतस्यसामायिकंतिष्ठति
इत्येवंकेवलिनांशासनं एवंकेवलिनामाज्ञाशिक्षावाअथवास्मिन्केवलिशासनेजिनागमेतस्यसामायिकंति
ष्ठतीतिसमत्वभावपूर्वकंभेदेनसामायिकंमाह जोसमोसव्वभूदेसु तसेसुथावरेसुय यःसमःसर्वभूतेषुत्र
सेषुस्थावरेषुचसमःतेषामपीडाकरस्तस्यसामायिकमिति रागद्वेषविकाराभावभेदेनसामायिकमाह जस्स
रागोयदोसोय वियडिंणजणंतिदु यस्यरागद्वेषौविकृतिविकारंनजनयतस्तस्यसामायिकमिति कषाय
जयेनसामायिकमाह जेणकोहोयमाणोय मायालोभोयणिज्जिदो येनक्रोधमानमायालोभाःसकषायाःसनोक
षायानिर्जितादलितास्तस्यसामायिकमिति संज्ञालेश्याविकाराभावभेदेनसामायिकमाह जस्ससण्णाय
लेसाय वियडिंणजणिंतिदु यस्यसंज्ञाआहारभयमैथुनपरिग्रहाभिलाषाःविकृतिविकारंनजनयंति तथाय
स्यलेश्याःकृष्णनीलकापोततेजःपद्मलेश्याःकषायानुरंजितयोगप्रवृत्तयोविकृतिंविकारंनजनयंतितस्यसामायि

श्रुतं

Ganesh-Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कमिति कामेंद्रियविषयवर्जनद्वारेण सामायिकमाह जो रसेंदियफासे य कामे वज्जेदि णिच्चसा। रसः कटु
२८१ कषायादिलक्षणः स्पर्शो मृद्वादिलक्षणः रसस्पर्शौ काम इत्युच्यते रसनेन्द्रियं स्पर्शनेन्द्रियं च कामेन्द्रिये यो
रसस्पर्शौ कामौ वर्जयति नित्यं कामेन्द्रिये च निरुणद्धि तस्य सामायिकमिति भोगेन्द्रियविषयवर्जनद्वारेण सा
मायिकमाह जो रूवगंधसद्दे य भोगे वज्जेदि णिच्चसा। यः रूपं कृष्णनीलादिलक्षणं गंधो द्विविधः सुरस्य-
सुरभिभेदेन च शब्दो वीणावंशादिसमुद्भवः रूपगंधशब्दा भोगा इत्युच्यन्ते चक्षुर्घ्राणश्रोत्राणि भोगेन्द्रियाणि यो रू- नि जमेद:
पगंधशब्दान् वर्जयति भोगेन्द्रियाणि च नित्यं सर्वकालं निवारयति तस्य सामायिकमिति दुष्टध्यानपरिहारेण सा
मायिकमाह जो दु अट्टं च रुद्दं च झाणं वज्जेदि णिच्चसा चकारो अनयोः स्व- भेदप्रतिपादकावित्यत्र वे =निक्षेप ८-५
दितव्यः यस्तु आर्त्तं चतुःप्रकारं रौद्रं च चतुःप्रकारं ध्यानं वर्जयति सर्वकालं तस्य सामायिकमिति शुभध्यान
द्वारेण सामायिकस्थानमाह जो दु धम्मं च सुक्कं च झाणं झायदि णिच्चसा अत्रापि चकारौ अनयोः १८५
स्वभेदप्रतिपादकाविति कृत्वैवमाह यस्तु धर्म्मं चतुःप्रकारं शुक्लं च चतुःप्रकारं ध्यायति युनक्ति सर्वकालं तस्य
सामायिकं तिष्ठतीति केवलिशासने इति सर्वत्र संबंधो द्रष्टव्य इति किमर्थं सामायिकं प्रज्ञप्तमित्याशंकायामा

ह सावज्जजोगपरिवज्जणट्ठं सामाइयं केवलीहिं पसत्थं गिहत्थधम्मो परमत्ति णच्चा कुज्जा बुधो अप्पहियं
२८२ पसत्थं सावद्ययोगपरिवर्जनार्थं पापास्रववर्जनाय सामायिकं केवलिभिः प्रशस्तं प्रतिपादि
तं स्तुतमिति यस्मात्तस्माद् गृहस्थधर्मः सारंभारंभादिप्रवृत्तिविशेषो परमो जघन्यः संसारहेतुरिति ज्ञात्वा बुधः
संयतः प्रशस्तं शोभनमात्महितं सामायिकं कुर्यादिति पुनरपि सामायिकमाहात्म्यमाह सामाइयम्हि दु क
दे समणो इर सावओ हवदि जम्हा एदेण कारणेण दु बहुसो सामाइयं कुज्जा सामायिके तु कृते सति श्राव
कोपि किल श्रमणः संयतो भवति यस्मात् कस्मिंश्चित् स्ववणिकश्रेष्ठिश्रावकः सामायिकसंयमं समवष्टब्धोवा तस्य सा
मेरुरिव निश्चलस्य पुत्रनप्तृबंधादिमरणपीडादिमहोपसर्गः संजातस्तथापि स न सामायिकव्रतान्निर्गतो तदा स श्रमणः संवृ
त्तः तदिह श्रावकत्वं कथं प्रत्याख्यानमंदतरत्वादत्र कथा वाच्याः तस्मादनेन कारणेन बहुशो बाहुल्येन सामायि
कं कुर्यादिति पुनरपि सामायिकमाहात्म्यमाह सामाइए कदे सावएण विद्धो मओ अरण्णम्हि सो य मओ उद्धा
दो ण य सो सामाइयं फिडिओ सामायिके सामायिके कृते सति श्रावकेण विद्धो व्यथितः कतापि मृगो
मृगो हरिणपोतः अरण्ये अटव्यां सो य मओ स चापि मृगः उद्धादो मृतः प्राणैर्विमुक्तः ण य सो न चासौ सामायिकं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२६३ सामायिकात्किडिवनिर्गतः परिहीणः केनचिद्व्याक्षेपेणाटव्यां सामायिके कृते शल्पेन विद्धस्य पादांतरे आग
त्यु व्यवस्थितो वदनांतः सत्त्वो कवारे स्थितो स तोषेणानां सो श्रावकः सामायिकात्तस्मान्निर्गतः संसारदोषदर्शना
दितितेन कारणेन सामायिकं क्रियत इति संबंधः केन सामायिकमुपदिष्टमित्याशंकायामाह बावीसंतित्थय
रा सामाइयसंजमं उवदिसंति छेदोवट्ठावणियं पुण भयवं उसहो य वीरो य द्वाविंशतितीर्थकरा अजितादिपा
र्श्वनाथपर्यंताः सामायिकमुपदिशंति प्रतिपादयंति छेदोपस्थापनं पुनः संयमं ऋषभो वीरश्च प्रतिपादयति किमर्थं
ऋषभमहावीरौ छेदोपस्थापनं प्रतिपादयतो यस्मात् आचक्खिदुं विभजिदुं विण्णादुं चावि सुहदरं होदि एदेण
कारणेण दु महव्वदा पंच पण्णत्ता आचक्षितुं आख्यातुं कथयितुं आस्वादयितुं वा विभजितुं पृथक् भावयितुं वि
ज्ञातुं विज्ञातुमवबोद्धुं चापि सुष्ठु सुखतरं सुखग्रहणादि भवति एतेन कारणेन महाव्रतानि
पंच प्रज्ञप्तानि पंच प्रज्ञप्तानि यस्मादन्यस्मै प्रतिपादयितुं स्वेच्छानुष्ठातुं विभक्तुं विज्ञातुं चापि भवति सुखतरं सामायिकं ते १४६
न कारणेन महाव्रतानि पंच प्रज्ञप्तानीति किमर्थमादिमंते तीर्थे छेदोपस्थापनमित्याशंकायामाह आदीए
दुव्विसोधणे णिहणे तह सुट्ठु दुरणुपालये पुरिमा य पच्छिमा वि हु कप्पाकप्पं ण जाणंति आदितीर्थे शिष्या दु

खेन शोध्यंते सुष्ठु ऋजुस्वभावा यतः तथा पश्चिमतीर्थे शिष्या दुःखेन प्रतिपाल्यंते सुष्ठु वक्रस्वभावा यतः पूर्वकाल
२६४ शिष्याः पश्चिमकालशिष्याश्च अपि स्फुटं कल्प्यं योग्यं अकल्प्यमयोग्यं च न जानंति यतस्ततश्चादौ निधने च छेदोपस्था
पनमुपदिश्यत इति सामायिककरणक्रममाह पडिलिहियअंजलिकरो उवजुत्तो उट्ठिऊण एयमणो अव
क्खित्तो वुत्तो करेदि सामाइयं भिक्खू प्रतिलेखितांजलिकरा यन्नासौ प्रतिलेखितांजलिकरः उपयुक्तः समाहि
तमतिः स्थित्वा एकाग्रमनाः अव्याक्षिप्तचित्तः आगमोक्तक्रमेण करोति सामायिकं भिक्षुः अथवा प्रतिलेख्य शु
द्धो भूत्वा द्रव्यक्षेत्रकालभावशुद्धिं कृत्वा प्रकृष्टांजलिकरः कृतांजलिकरः मुकुलितकरः प्रतिलेखनेन सहितांजलिक
रो वा सामायिकं करोतीति सामायिकनिर्युक्तिमुपसंहर्तुं चतुर्विंशतिस्तवं सूचयितुं प्राह सामाइयणिज्जुत्ती
एसा कहिया मए समासेण चउवीसयणिज्जुत्ती एत्तो उड्ढं पवक्खामि सामायिकनिर्युक्तिरेषा कथिता समासा
~~न इतऊर्ध्वं चतुर्विंशतिस्तवनिर्युक्तिमुपसंहर्तुं चतुर्विंशतिस्तवं सूचयितुं प्राह सामाइयणिज्जुत्ती एसा कहि~~
~~या मए समासेण चउवीसयणिज्जुत्ती एत्तो उड्ढं पवक्खामि~~ सामायिकनिर्युक्तिरेषा कथिता समासेन इत ऊर्ध्वं
~~चतुर्विंशतिस्तवनिर्युक्तिं प्रवक्ष्यामीति तदनुबोधनार्थं निक्षेपानाह~~ णामट्ठवणा दव्वे खेत्ते काले य होइ भावे य
+प्रवक्ष्यामीति तदनुबोधनार्थं निक्षेपानाह ॥छो॥ ३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एसो थवं निरिणेउ तरिकेणोछ्छिदिस्सेदि   नामस्तवः स्थापनास्तवः द्रव्यस्तवः क्षेत्रस्तवः कालस्तवः भावस्तवः ॥
२६५ मस्तवे निक्षेपः षड्विधः स्तवेति ज्ञातव्यः चतुर्विंशतितीर्थकराणां यथार्थानुगतैरष्टोत्तरसहस्रसंख्यैर्नामभिः स्तवनं चतु
र्विंशतिनामस्तवः चतुर्विंशतितीर्थकराणामपरिमितानां कृत्रिमाकृत्रिमस्थापनानां स्तवनं चतुर्विंशतिस्थापनास्त
वः तीर्थकरशरीराणां परमौदारिकस्वरूपाणां वर्णनेन स्तवनं द्रव्यस्तवः कैलाससम्मेदोर्जयंतपावाचंपानगरादिनि
र्वाणक्षेत्राणां समवसृतिक्षेत्राणां च स्तवनं क्षेत्रस्तवः स्वर्गावतरणजन्मनिःक्रमणकेवलोत्पत्तिनिर्वाणकालानां
स्तवनं कालस्तवः केवलज्ञानकेवलदर्शनादिगुणानां स्तवनं भावस्तवः अथवा जातिद्रव्यगुणक्रियानिरपेक्षं संज्ञा
कर्म चतुर्विंशतिमात्रं नामस्तवः चतुर्विंशतितीर्थकराणां साकारानाकृतिवस्तुनि गुणानां रोपः स्तवनं स्थापनास्तवः द्र
व्यस्तवो द्विविध आगमनोआगमभेदेन चतुर्विंशतिस्तवव्यावर्णनप्राभृतज्ञायकोऽनुपयुक्तः आगमद्रव्यस्तवः चतु
र्विंशतिस्तवव्यावर्णनप्राभृतज्ञशरीरभाविनी तद्व्यतिरिक्तभेदेन नोआगमद्रव्यस्तवस्त्रिविधः सर्वं तत्संबद्धं चतु १४१
र्विंशतिस्तवसहितं क्षेत्रं कालश्च क्षेत्रस्तवः कालस्तवश्च भावस्तवः आगमनोआगमभेदेन द्विविधः चतुर्विंशतिस्तवव्या
वर्णनप्राभृतज्ञायक उपयुक्तः आगमभावचतुर्विंशतिस्तवः चतुर्विंशतिस्तवपरिणतपरिणामो नोआगमभावस्तवः

इति भरतैरावतापेक्षया चतुर्विंशतिस्तव उक्तः पूर्वविदेहापरविदेहापेक्षया सामान्यतीर्थकरस्तव इति कृत्वा न दोषः इ
२६६ ति अत्र नामस्तवेन भावस्तवेन च प्रयोजनं सर्वत्र वा प्रयोजनं तदर्थमाह   लोगुज्जोए धम्मतित्थयरे जिणवरे य अर
हंते कित्तण केवलिमेव य उत्तमबोधिं मम दिसंतु   लोकोद्योतः जगदुद्योतः प्रकाशः धर्म उत्तमक्षमादिः तीर्थं सं
सारतारणोपायं धर्ममेव तीर्थं कुर्वंतीति धर्मतीर्थकराः कर्मारातीन् जयंतीति जिनाः तेषां वराः प्रधाना जिनवराः अर्ह
तः सर्वज्ञाः कीर्तनं प्रशंसनं कीर्तनीया वा केवलिनः सर्वप्रत्यक्षावबोधाः एवं च उत्तमाः प्रकृष्टाः सर्वप्रपूज्याः मम बोधिं संसार
निस्तरणोपायं दिशंतु ददतु एवं स्तवः क्रियते अर्हंतो लोकोद्योतकराः धर्मतीर्थकरा जिनवराः केवलिन उत्तमाश्च
ये ते वा कीर्तनप्रशंसनं बोधिं मह्यं दिशंतु प्रयच्छंतु अथवा एते अर्हंतो तीर्थकरा लोकोद्योता जिनवराः कीर्तनीयाः उत्त
+ त४ माः केवलिनो मम बोधिं दिशंतु अथवा अर्हंतः सर्वविशेषणविशिष्टाः केवलिनश्च कीर्तनं मह्यं बोधिं प्रयच्छंत्विति सं
बंधः एतैर्दशाधिकारैश्चतुर्विंशतिस्तवो व्याख्यायते इति कृत्वा आदौ तावल्लोकनिरुक्तिमाह   लोगदि आ
लोगादि पलोयदि सल्लोगदि त्ति य एगट्ठो जम्हा जिणा दिकसिणं तेणं सो वुच्चदे लोगो   लोक्यते आलोक्यते प्रलोक्यते
संलोक्यते इत्येकार्थः कैर्जिनैरिति तस्माल्लोक इत्युच्यते कथं चतुरवस्थायां मतिज्ञानश्रुतिज्ञानाभ्यां लोक्यते इत्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२८१ तेयस्मात्तस्माल्लोकः अथवावधिज्ञानेनलोक्यते रूपिपुद्गलमर्यादारूपाणि द्रव्याणि यस्मात्तस्माल्लोकः अथवामनःप
र्ययज्ञानेनप्रलोक्यते विशेषणरूपाणि द्रव्याणि यस्मात्तस्माल्लोकः अथवा केवलज्ञानेनजिनैः कृत्स्नं यथावस्थ
तितथा लोक्यते सर्वद्रव्यपर्यायैः सम्यगुपलभ्यते यस्मात्तस्माल्लोकः तेनैकारणेनलोकः संज्ञसुच्यतइति नवप्र
कारैर्निक्षेपैर्लोकस्वरूपमाह णामट्ठवणंदव्वं खेत्तंचिण्हंकसायलोओय भवलोगोभावलोगो पज्जयलोगोय
णायव्वो नात्रवितर्कनिर्देशस्याधीन्यणाकतन्यथाप्रदिष्टः लोकशब्दः प्रत्येकमभिसंबध्यते नामलोकः
स्थापनालोकः द्रव्यलोकः क्षेत्रलोकः चिह्नलोकः कषायलोकः भवलोकः भावलोकः पर्यायलोकश्च ज्ञातव्यः
इति तत्रनामलोकंविवृण्वन्नाह णामाणिजाणिकाणिवि सुहासुहाणियसंतिलोयम्मि णामलोगंवियाण
हि अणंतजिणदेसियं नामानिसंज्ञारूपाणियानिकानिचित्तुभान्यशुभानिचशोभनान्यशोभनानिचसंतिवि
द्यंतेजीवलोकेस्मिन्नतन्नामलोकमनंतजिनदर्शितंविजानीहि नविद्यतेनोविनाशोयस्मानंतोयस्यासौअनंतजिनस्तेनदर्शितं १४८
जिनाअनंतजिनास्तैर्दृष्टाःयतः इतिस्थापनालोकमाह ठविदंठविदंचावि जंकिंचिअच्छिलोगम्हि ठवणालोगंवि
याणाहि अणंतजिणदेसियं स्थापितंस्थितंमकृत्रिमं वास्थापितंकृत्रिमंचापियत्किंचिदस्तिविद्यतेस्मि

नलोके तत्सर्वंस्थापनालोकमितिजानीहि अनंतजिनदर्शितत्वादिति द्रव्यलोकस्वरूपमाह जीवाजीवंरूवारू
वं सपदेसमप्पदेसंच दव्वलोगंवियाणाहि अणंतजिणदेसियं जीवाश्चेतनावंतः अजीवाः कालाकाशधा
र्माधर्माः पुद्गलारूपिणः रूपरसगंधस्पर्शशब्दवंतः पुद्गला अरूपिणः कालाकाशधर्माधर्माजीवाप्रदेशाः सर्व
२८२ जीवादयः अप्रदेशाःकालाणुपरमाणवश्चैवं सर्वलोकं द्रव्यलोकं विजानीहि अकृत्यसर्वज्ञदृष्टायतः इतितथाप्यपि
द्रव्यलोकंविजानीहीत्याह परिणामजीवमुत्तं सपदेसंएककखेत्तकिरियाय णिच्चंकारणकत्ता सव्वगदिदर
हियदव्वं परिणामान्यथाभावोविद्यतेयपांतपरिणामिनः केतेजीवपुद्गलाः शेषाणिधर्माधर्मकालाका
शानि अपरिणामानिकृतानि द्रव्यार्थिकनयापेक्षया व्यंजनपर्यायंवाश्रित्यैतदुक्तं पर्यायार्थिकनयापेक्षयापुनःसर्व
पर्यायमाश्रित्यसर्वेपिपरिणामास्तद्यत्सजीवाजीवद्रव्यं चेतनालक्षणायतः अजीवाः पुनः सर्व
पुद्गलादयोजीवत्वात् दृष्टवाद्यभावादिति मूर्तंपुद्गलद्रव्यंरूपादिमत्त्वात् शेषाणिजीवधर्माधर्मकालाकाशान्यमू
र्त्तानिरूपादिविरहितत्वात् सप्रदेशानिसांशानिजीवधर्माधर्मपुद्गलाकाशानिसप्रदेशाबंधदर्शनात् अप्रदेशाःका
लाणवःपरमाणुश्चप्रचयाभावात् धर्माधर्मकाशान्येकरूपाणिसर्वदाप्रदेशविघातनाभावात् शेषाःसंसारिजीव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शेषाधर्माधर्मपुद्गलाकाशकालानां कर्तारः प्रभुः प्रभुत्वेनोक्तत्वात् जीवात्

जीवपुद्गलकालाः अनेकरूपाः प्रदेशानां सद्दर्शनात् आकाशं सकलं सर्वपदार्थानामाधारत्वात् शेषाः जीवपुद्गल
धर्माधर्मकालाः अक्षत्राणि अवगाहनलक्षणत्वाभावात् जीवपुद्गलाः क्रियावन्तो गतेर्दर्शनात् शेषा धर्माधर्मा
काशकालाः अक्रियावंतः गतिक्रियाया अभावदर्शनात् नित्याः धर्माधर्माकाशाः परमार्थकालाश्च व्यवहारनया
पेक्षया वाचनपर्यायास्तावत्प्रदेशाः विनाशाभावात् जीवपुद्गलाः अनित्या व्यंजनपर्यायदर्शनात् कारणानि पुद्गल
धर्माधर्मकालाकाशानि जीवोपकारकत्वेनाकारणत्वात् जीवः अकारणं स्वतंत्रत्वात् जीवः कर्ता शुभाशुभफलभो
क्तृत्वात् आकाशं सर्वगतं सर्वत्रोपलभ्यमानत्वात् शेषाण्यसर्वगतानि जीवपुद्गलधर्माधर्मकालद्रव्याणि सर्व
त्रोपलभ्यमानत्वात् तस्मात् परिणामजीवमूर्त्तप्रदेशैकक्षेत्रक्रियानित्यकारणाः कर्तृसर्वगतितिस्वरूपेण द्रव्य।
लोकं जानीहि इति स्वरूपं परिणामादिनिः प्रदेशाः द्रव्यलोकं जानीहीति संबंधः क्षेत्रलोकस्वरूपं विवृण्वन्नाह ।
आगासमपदेसं उड्ढमहतिरियं लोगं च खेत्तलोगं वियाणाहि अणंतजिणदेसियं आकाशं सप्रदेशं १८५
आगासमपदेसं उड्ढमहातिरियं लोगं च खेत्तलोगं वियाणाहि अणंतजिणदेसियं आकाशं सप्रदेशं
प्रदेशाः मध्यलोकं मध्यलोकं अधोलोकं चैतत्सर्वं क्षेत्रलोकमनंतजिनदृष्टं विजानीहीति चिह्नलोकमा
ह जं दिट्ठं संठाणं दव्वाण गुणाण पज्जयाणं च चिह्नलोगं वियाणाहि अणंतजिणदेसियं धम्मं द्रव्य

संस्थानं धर्माधर्मयोर्लोकाकारेण संस्थानं कालद्रव्यस्याकाशप्रदेशस्वरूपेण संस्थानं आकाशस्य केवलज्ञान
२०० स्वरूपेण संस्थानं लोकाकाशस्य गृहगुहादिस्वरूपेण संस्थानं जीवद्रव्यस्य समचतुरस्रन्यग्रोधादिस्वरूपेण संस्था
नं गुणानां द्रव्याकारेण कृष्णनीलशुक्लादिस्वरूपेण वा संस्थानं पर्यायाणां दीर्घह्रस्ववृत्तत्र्यस्रचतुरस्रादिनारका
तिर्यङ्मनुष्यदेवत्वादिस्वरूपेण संस्थानं यदृष्टं संस्थानं द्रव्याणां गुणानां पर्यायाणां च चिह्नलोकं विजानीहि
ति कषायलोकमाह कोहो माणो माया लोभो उदिण्णा जस्स जंतुणो कसायलोगं वियाणाहि अणंतजिणदे
सियं धम्मं यस्य जंतोर्जीवस्य क्रोधमानमायालोभा उदीर्णा उदयमागतास्तं कषायलोकं विजानीहीति अनंत
जिनदर्शितं भवलोकमाह णेरइयदेवमाणुस तिरिक्खजोणिं गदा य जे सत्ता णिययभवे वट्टंता भवलोगं वि
याणाहि नारकदेवमनुष्यतिर्यग्योनिषु गताश्च ये जीवा निजभवे निजायुःप्रमाणे वर्तमानास्तं भवलोकं वि
जानीहीति भावलोकमाह तिव्वो रागो य दोसो य उदिण्णा जस्स जंतुणो भावलोगं वियाणाहि अणंतजिणदेसि
यं यस्य जंतोः तीव्रो रागः कषायो प्रीतिर्विप्रीतिः उदीर्णा उदयमागताः तं भावलोकं विजानीहीति अनंतजिनदेशि
तं पर्यायलोकमाह दव्वगुणखेत्तपज्जय भवाणुभावो य भावपरिणामो जाण चउव्विहमेवं पज्जयलोयं समासे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ द्रव्याणां गुणा ज्ञानदर्शनसुखवीर्यकर्तृत्वलोकत्वस्वतीनस्वरूपीनातिकारकत्वादयो गादयो गुरु
लघुवर्त्तमानादयः स्वत्रपर्याया सप्तनरकपृथिवीजंबूद्वीपसर्वविदेहपर्वतस्वर्गरावतद्वीपसमुद्रत्रिषष्टिस्व
र्गपटलनिनेदादयः तवानामप्तनवः आयुर्वेदघन्यमध्यमात्कृष्टविकल्पलावानामपरिणामः संख्यातलोकप्रदे
शमात्रः शुद्धात्मस्वरूपः कर्मादानेपरित्यागेवाऽसमर्थः द्रव्यस्यगुणाः पर्यायलोकः स्वतस्यपर्यायाः पर्याय
लोकः नवस्यातत्त्वाः पर्यायलोकः लावानामपरिणामः पर्यायलोकः एवंचत्तुर्विधंपर्यायलोकंसमासतज्जानी
वीति उद्योतस्यस्वरूपमाह अज्ञानेखलुद्विविहो णादव्वोदव्वभावसंजुत्तो दव्वुज्जोवो अग्गी चंदासूरामणीचेव
उद्योतः प्रकाशः खलुस्फुटंद्विविधः ज्ञातव्यो द्रव्यलावलेदेन द्रव्यसंयुक्तोलावसंयुक्तश्च तत्रद्रव्योद्योतः अ
ग्निश्चंद्रः सूर्यो मणिश्चएवकारः प्रकारार्थान्तविद्युत्मादिद्रव्योद्योतोज्ञातव्यो वक्तव्यइति लावोद्योतंनिरूपयन्नाह
लावुज्जोवणाणं जहभणियंसव्वलावदरसीहिं तस्सदुपउगकरणे लावुज्जोवत्तिणायव्वो लावोद्योतो १५५
नामज्ञानंयथालणितंसर्वलावदर्शिलिर्यनप्रकारेणसर्वपदार्थदर्शिलिर्ज्ञानमुक्तंतुज्ञावोद्योतः परमार्थोद्योतस्त
स्यज्ञानस्योपयोगकरणात् स्वपरप्रकाशकत्वात्लावोद्योतइतिज्ञातव्यः पुनरपिलावोद्योतस्यलेदमाह पंचवि

हखलुलणियं लावुज्जोयंजिणवरिंदेहिं आभिणिबोहियसुदओहिणाणमणकेवलमयं सलावोद्योतो
जिनवरेंद्रैः पंचविधः पंचप्रकारः खलुस्फुटंलणितः प्रतिपादितः आभिनिबोधिकश्रुतावधिज्ञानमनःपर्यय
केवलमयः मतिश्रुतावधिमनःपर्ययकेवलज्ञानलेदेनपंचप्रकारइति द्रव्यलावोद्योतयोः स्वरूपमाह द
व्वुज्जोवुज्जोवो पडिहम्मदिपरिमिदंहिखेत्तंहि लावुज्जोवुज्जोवो लोगालोगंपयासेदि द्रव्योद्योतोयउद्योतः स
प्रतिहन्यते अनन्तद्रव्याणंपरिमितत्वक्षेत्रेवर्त्तते लावोद्योतः पुनरुद्योतोलोकमलोकंचप्रकाशयतिनप्रतिहन्यते
नापिपरिमितक्षेत्रे अप्रतिघातिसर्वगतत्वादिति लोगस्सुज्जोयगरा दव्वुज्जोएणणहुजिणाहोंति
लावुज्जोयपरा पुणहोंतिजिणवराचउवीसं लोकस्योद्योतकराः द्रव्योद्योतेननैवलवंतिजिनालावोद्योतका
राः पुनर्लवंतिजिनवराश्चतुर्विंशतिः अतोलावोद्योतेनैवलोकस्योद्योतकरोतिनान्यइतिस्थितमितिलोकोद्योत
कराइतिव्याख्यातं धर्मतीर्थकराइतिपदंव्याख्यातुकामःप्राह तिविहोयहोइधम्मो सुदधम्मोअत्थिकाय
धम्मोय तदिउचरित्तधम्मो सुदधम्मोएत्थपुणतित्थं धर्मस्त्रिविधः प्रकारोलवति श्रुतधर्मोऽस्तिकायधर्मः तृती
यश्चारित्रधर्मः अत्रपुनः श्रुतधर्मस्तीर्थंतिरसंसारसागरंतरंतियेनतत्तीर्थमिति तीर्थस्यस्वरूपमाह दवि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दुविहं च होदि तित्थं णादव्वं दव्वभावसंजुत्तं एदेसिं दोण्हंपि य पत्तेय परूवणा होदि ॥ द्विविधं च भवति तीर्थं द्रव्यभावसंयुक्तं
भावसंयुक्तं भवति द्रव्यतीर्थमपरमार्थरूपं भावतीर्थं पुनः परमार्थभूतं तमन्यापदेशो नावान् एतयोर्द्वयोरपि तीर्थयोः
प्रत्येकं प्ररूपणा भवति द्रव्यतीर्थस्वरूपमाह ॥ दाहोपसमणं तण्हाछेदो मलपंकपवहणं चेव तिहिं कारणेहिं
जुत्तो तम्हा तं दव्वदो तित्थं ॥ द्रव्यतीर्थेन दाहस्य संतापस्योपशमनं भवति तृष्णायाश्छेदो विनाशो भवति स्तोक
कालं पंकस्य मलस्य कर्दमस्य प्रवहणं शोधनमेव भवति न धर्मादिकाः गुणाः तस्मात्त्रिभिः कारणैर्युक्तं द्रव्यतीर्थं भवतीति भावती
र्थस्वरूपमाह ॥ दंसणणाणचरित्ते णिज्जुत्ता जिणवरा दु सव्वेवि तिहिं कारणेहिं जुत्ता तम्हा ते भावदो तित्थं ॥
दर्शनज्ञानचारित्रैर्नियुक्ताः संयुक्ता जिनवराः सर्वेऽपि ते तीर्थं भवंति तस्मात्त्रिभिः कारणैरपि भावतस्तीर्थमिति भावो
द्योतेन लोकोद्योतकराः भावधर्मतीर्थकर्तृत्वेन धर्मतीर्थकरा इति । अथवा दर्शनज्ञानचारित्राणि जिनवरैः सर्वैरपि
निर्युक्तानि सेवितानि तस्मात्तानि भावतस्तीर्थमिति । जिनवरा अर्हन्त इति पदं व्याख्यातुकामः प्राह ॥ जिदकोहमा १५१
णमाया जिदलोहा तेण ते जिणा होंति । हंता अरिं च जम्मं अरहंता तेण वुच्चंति ॥ यस्माज्जितक्रोधमानमायालो
भास्तस्माज्जिनकारणेन ते जिना इति भवंति यतोऽरीणां हंतारो जन्मनः संसारस्य च हंतारः ततोऽर्हंत इत्युच्यंते यतश्च

अरहंति वंदणणमंसणाणि अरहंति पूयसक्कारं अरहंति सिद्धिगमणं अरहंता तेण वुच्चंति
॥ प्रणामः नमस्कारस्य च योग्याः पूजासत्कारमर्हंति यतो वंदनाया नमस्कारस्य च योग्याः वंदनानमस्कारमर्हं
ति यस्मात्सिद्धिगमनस्य च योग्याः सिद्धिगमनमर्हंति यस्मात्तेनार्हंत इत्युच्यंते । किमर्थं ते कीर्त्यंत इत्याशंका
यामाह ॥ किह ते ण कित्तणिज्जा सदेवमणुयासुरेहिं लोगेहिं दंसणणाणचरित्ते तवविणओ जेहिं पण्णत्तो ॥
कथं ते न कीर्तनीया व्याख्यातव्याः सदेवमनुष्यासुरलोकैः दर्शनज्ञानचारित्रतपसां विनयाय प्रज्ञप्तः प्रति
पादितस्ते च चतुर्विंशतितीर्थकराः कथं न कीर्तनीया इति । कीर्तनमधिकारं व्याख्याय केवलिनां स्वरूपमाह
॥ सव्वं केवलिकप्पं लोगं जाणंति तह य पस्संति केवलणाणचरित्ता तम्हा ते केवली होंति ॥ किमर्थं केवलि
न इत्युच्यंत इत्याशंकायामाह यस्मात्सर्वं निरवशेषं केवलिकल्पं केवलज्ञानविषयं लोकमलोकं च जानंति ता
था च पश्यंति केवलज्ञानमेव चारित्रं येषां ते केवलज्ञानचारित्राः परित्यक्ताशेषव्यापारास्तस्मात्ते केवलिनो भवं
तीति । अथोत्तमाः कथं इत्याशंकायामाह ॥ मिच्छत्तवेदणीयं णाणावरणं चरित्तमोहं च तिविहा तमाउ मुक्का
तम्हा ते उत्तमा होंति ॥ मिथ्यात्ववेदनीयमश्रद्धानरूपं ज्ञानावरणं ज्ञानदर्शनयोरावरणं चारित्रमोहश्चेति त्रिवि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धंतमस्तस्मात्सुक्तो यतस्तस्मान्नवत्तमाः प्रसन्ना नवंतीति तेएवं विशिष्टा मम आरोग्गबोहिलाभं दिंतुस
204 माहिवरमजिणवरिंदा किंणकिणिदाणमेदं णवरिविभासकायबा एवं विशिष्टास्ते जिनवरेंद्रा मम सा
मरागमेता तिजरामरणानां वंबोधिलाभं च जिनस्वरूपप्राप्तिं दीक्षाभिमुखीकरणं वा समाधिं च मरणकाले सम्प्रा
वद्धिणाणं दक्षुप्रयच्छंतु किंपुनरिदं निदानं न भवति न भवत्येव कस्मात् विभाषाविकल्पोत्र कर्तव्यो यस्मादिति
एतस्मात्वदनिदानं न भवति यतः नासा अमच्चमोसा णवरि भत्तिए भणीयसा सिद्धा तासा णक्खीणपेज्जदोसा
दितु समाहिं च बोहिं च असत्यमृषा भाषेयं किं तु केवलं भक्त्या भाषितेयं यस्मान्न हि क्षीणरागद्वेषा जिना ददतीस
माधिं बोधिं च यदि दातव्यमेतैस्तर्हि रागद्वेषाः स्युरिति अन्यच्च जं तेहिं दु दायव्वं तंदिण्णं जिणवरेहिं सव्वेहिं दंस
णणाणचरित्तस्स एसतिविहस्स उवदेसो यत्तैर्दातव्यं तद्दत्तमेव जिनवरैः सर्वैः किं तत् दर्शनज्ञानचारित्रा
णां त्रिःप्रकाराणामेवैकं एतत्पदं शः अस्मात्किमधिकं यत्प्रार्थ्यते इति एषा च समाधिबोधिप्रार्थना भक्तिर्भवतिय १५२
तोतत्आह भत्तीए जिणवराणं खीयदि जं पुव्वसंचियं कम्मं आयरियपसाएण य विज्जामंता य सिज्झंति
यत्तैस्ताद्दातव्यं तद्दत्तमेव जिनवरैः सर्वैः किं तत् दर्शनज्ञानचारित्राणां त्रिःप्रकाराणामेव तत्पदेशः अस्मात्किम।

यस्मादाचार्याणां च भक्तिः किमर्थमाचार्याणां च प्रसादेन विद्या मंत्राश्च सिद्धिमुपगच्छंतियस्मादितिः २

धिकं यत्प्रार्थ्यते इति एषा च समाधिबोधिप्रार्थना भक्तिर्भवतियतः ततआह भत्तीए जिणवराणं खीयदि जं पुव्वसंचि
205 यं कम्मं आयरियपसाएण य विज्जामंता य सिज्झंति जिनवराणां भक्त्या पूर्वसंचितकर्म क्षीयते विनश्यते तस्मा
ज्जिनानामाचार्याणां च भक्तिर्यैर्न निदानमिति अरहंतेसु य रागो ववगदरागेसु दोसरहिदेसु धम्मंहि य
जो रागो सुदे य जो बारसविधम्हि अपगतरागेषु अष्टादशदोषरहितेषु अर्हत्सु यो रागो या भक्तिस्तथा धर्मे यो रागः
श्रुते द्वादशविधे यो रागस्तथा आयरिएसु य राओ समणेसु य बहुसुदे चरित्तड्ढे एसो पसत्थराओ हवदि सरागेसु
सव्वेसु आचार्येषु रागः श्रमणेषु बहुश्रुतेषु चर्यारागश्चारित्राढ्येषु च रागः स एष रागः प्रशस्तः शोभनो भवति
सरागेषु सर्वेष्विति तेसिं अहिमुहदाए अत्था सिज्झंति तह य भत्तीए तो भत्ति रागपुव्वं वुच्चइ एदं ण हु णिदा
णं तेषां जिनवरादीनामभिमुखतया तद्भक्त्या चार्था वांछितं इहसिद्धयः सिध्यंति तस्मात्तथा सा भवति यस्माद्भक्ति रा
गपूर्वकमेतदुच्यते नेदं निदानं संसारकारणाभावादिति चतुर्विंशतिस्तवविधानमाह चउरंगुलंतरपादो
पडिलेहिय अंजलीकयपसत्थो अव्वाखित्तो वुत्तो कुणदि य चउवीसत्थयं भिक्खू चतुरंगुलांतरपादस्थितः
प्रतिलेख्य अंजलिं कृत्वा प्रशस्तः अव्याक्षिप्तः सर्वव्यापारमुक्तः शरीरादिविचित्तादिकं प्रशोध्य प्रांजलिः सौम्यभा
गः परित्यक्तशरीरावयवचालनप्रकारादेतद्धष्टं चतिलिखव्यशरीरस्तमिचित्तादिकं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तांजलिपुटेनचक्रनास्तांसामन्ननावाव्याक्षिप्तःसर्वव्यापाररहितःकरोतिचतुर्विंशतिस्तवंलक्षुःसंयतनयुग्चतुरंगुलमं
तरंस्ययोपापादयोस्तावतुरंगुलौतंगतौपादौयस्यसचतुरंगुलपादःस्थितनिश्चलंसंगयस्यसस्थितःगःगानना
कायिकवाचिकमानसिकक्रियइत्यर्थः चतुर्विंशतिस्तवनिर्युक्तिसुपसंहरन्नुवंदनानिर्युक्तिंचप्रतिपादयितुमा
ह चतुर्वीसयथाउत्ती एसाकदियासणसमासेण वंदणणिज्जुत्तीपुण एत्तोवुड्ढंपवक्खामि एकतीर्थ
चतुर्विंशतिनिर्युक्तिरेषाकथितामयासमासेननवंदनानिर्युक्तिंपुनरितऊर्ध्वंप्रवक्ष्यामिप्रतिपादयिष्यामीतिनव
तांनामादिनिक्षेपःप्रतिपादयन्नाह णामट्ठवणादव्वे खेत्तेकालेभावेयवंदणाए पसोएवत्तुवेदणाणे णिक्खेवोय
छिदानणित्रे एकतीर्थकरनामोच्चारणंसिद्धाचार्यादिनामोच्चारणंचनामवंदनानिर्युक्तिरेकतीर्थ
काप्रतिबिंबस्यसिद्धाचार्यादिप्रतिबिंबानांचस्तवनंस्थापनावंदनानिर्युक्तिस्तपामेवद्रागीराणांस्तवनंद्रव्यवंदना
निर्युक्तिस्तैरध्युषितक्षेत्रमधिष्ठितकालश्चयोधिष्ठितस्तयोःस्तवनंक्षेत्रवंदनाकालवंदनाचएकतीर्थकरस्यसिद्धाचा
र्यादीनांचशुद्धपरिणामनयगुणस्तवनंतद्भावावंदनावंदनानिर्युक्तिर्नाम अथवाजातिद्रव्यगुणक्रियानिरपेक्ष १०३
संज्ञाकर्मवंदनाशब्दमात्रंनामवंदनावंदनापरिणतस्यप्रतिकृतिवंदनास्थापनावंदनाव्यावर्णनप्राभृतज्ञोनुपा

यक्तआगमद्रव्यवंदनाशेषःपूर्ववदिति एषवंदनायाःनिक्षेपःषड्विधोभवतिज्ञातव्यानामादिभेदेनेति नामवंदना
प्रतिपादयन्नाह किदियम्मंचिदियम्मं पूयाकम्मंचविणयकम्मंच कायव्वंकेणकस्सव कधवकहिंवकदिखु
त्तो पूर्वगाथार्द्धेनवंदनायाएकार्थःकथ्यतेपश्चार्द्धेनतद्विकल्पाइतिकृत्यतेत्रियतेनअष्टविधंकर्मछेद्यतेकृ
देकेनपरिणामेनक्रियययावातत्कृतिकर्मपापविनाशनोपायःक्रियतेसमावाक्रियतेसंचीयतेपुण्यकर्मतीर्थक
रत्वादियेनतच्चितिकर्मपुण्यसंचयकारणंपूज्यंतेअर्हंतादयोयेनतत्पूजाकर्मबहुवचनोच्चारणसकवंदना
दिकंविनीयतेनिराक्रियतेसंक्रमणोदयोदीरणादिभावेनप्राप्यंतेयतकर्माणितद्विनयकर्मशुश्रूषणंतत्क्रियाकर्मा
दिकंकेनकस्यकर्त्तव्यं कथंप्रवकेनविधानेनकर्त्तव्यं यस्मिन्नवस्थाविशेषेकर्त्तव्यंकतिवारान् तथा कदि
ओणदंकदिसिरं कदिआवत्तगेहिंपरिसुद्धं कदिदोसविप्पमुक्कं किदियम्मंहोदिकादव्वं कतिअवनतिक्रिये
त्यवनतानि कतिकरमुकुलांकितेनशिरसामात्रस्पर्शनानिकर्त्तव्यानि कदिसिरंक्रियतेविशारोसिकतिवागवंद्यारा
मिकरकृत्यंकर्त्तव्यं कतिआवर्त्तपदैपरिशुद्धंक्रियाविशेषवत्तेकःपरिशुद्धंकतिवारामनावचनकायाश्चावर्त्तनायाः
कतिदोसविप्पमुक्कंकतिदोषविप्रमुक्तंकृतिकर्मभवतिकर्त्तव्यमितिप्रश्नमालायांकृतायांतावत्कृतिकर्मविनयकर्म

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णेन कार्य इति ज्ञात्वा विनयकर्म्मणः सद्भावेजनां नित्यक्रियां मोद ॥ उक्ता विनयादिकर्म्म अथ विनयं चातुरंगमोरकाय
तस्मात् वदंति विउस्मो विणओ त्ति विलीणसंसारा ॥ यस्माद्विनयति विनाशयति कर्म्माष्टविधं चातुरंगात्संसारा
न्मोक्षं च यस्माद्विनयात्तस्माद्विद्वांसो विलीनसंसारा विनय इति वदंति ॥ पुव्वं चेव य विणओ परूविदो जि
णवरेहिं सव्वहिं सव्वासु कम्मभूमीसु णिच्चं सो मोक्खमग्गंमि ॥ पूर्वस्मिन् सर्वस्मिन् काले विनयः प्ररूपितो जि
नवरैः सर्वासु कर्म्मभूमिषु भरतैरावतविदेहेषु नित्यं सर्वकाले मोक्षमार्गे मोक्षमार्गहेतोः तस्मान्नो बोधका
कारणत्वाद् उपग्रहणीनां वा शेषकाले न कर्तव्या निश्चयेनात्र प्रवर्तितव्यमिति ॥ कतिप्रकारोऽसौ विनय इत्याशंका
यामाह ॥ लोगाणुवत्तिविणओ अत्थणिमित्ते य कामतंते य । भयविणओ य चउत्थो पंचमओ मोक्खविणओ य ॥
लोकस्यानुवृत्तिरनुवर्तनं लोकानुवृत्तिर्नाम प्रथमो विनयः अर्थस्य निमित्तं अर्थनिमित्तं कार्यहेतुर्विनयो द्वि
तीयः कामतंत्रे कामतंत्रहेतुः कामानुष्ठाननिमित्तं तृतीयो विनयः भयविनयश्चतुर्थः पंचमो मोक्षविनय एवं का
र्यकारणं पंचप्रकारो विनय इति तत्रादौ तावल्लोकानुवृत्तिविनयस्वरूपमाह ॥ अब्भुट्ठाणं अंजलि आसण
दाणं च अतिहिपूजा य । लोगाणुवत्तिविणओ देवदपूजा सविहवेण ॥ अभ्युत्थानं कस्मिंश्चिदागते आसना १५४

दुत्थानं प्रांजलिरंजलिकरणं स्वावासमागतस्यासनदानं तथातिथिपूजा च मध्याह्नकाले आगतस्य साधोरन्य
स्य वा यथाक्रमं देवतापूजा च स्वविभवेन स्ववित्तानुसारेण देवपूजा च एतत्सर्वं लोकानुवृत्तिर्नाम विनयस्त
था ॥ भासाणुवत्ति छंदाणुवत्तणं देसकालदाणं च । लोगाणुवत्तिविणओ अंजलिकरणं च अत्थकदे ॥ भाषाया
वचनस्यानुवृत्तिरनुवर्तनं यथासौ वदति तथा भाषणं भाषानुवृत्तिः छंदानुवर्तनं तदभिप्रायानुकूलाचर
णं देशयोग्यकालयोग्यं च यद्दानं स्वद्रव्योत्सर्गः यथासौ वदति तथा भाषणं भाषानुवृत्तिः छंदानुवर्तनं त
दभिप्रायानुकूलाचरणं सर्वमेतल्लोकानुवृत्तिर्विनयो लोकात्मीकरणार्थो यथायं विनयोंजलिकरणादिकः
अर्थकृते तथांजलिकरणादिकार्यार्थं यन्निमित्तं क्रियते सोऽर्थहेतुस्तथा ॥ एमेव कामतंते भयविणओ चेव
आणुपुव्वीए । पंचमओ खलु विणओ परूवणा तस्सिमा होदि ॥ यथा लोकानुवृत्तिर्विनयो व्याख्यातस्तथैव कामतं
त्रे भयविनयश्चैवानुपूर्व्या विज्ञातव्यो नानार्थः पुनः पंचमो विनयस्तस्येमाः प्ररूपणा भवतीति ॥ दंसण
णाणचरित्ते तवविणओ ओवचारिओ चेव । मोक्खम्हि एस विणओ पंचविहो होदि णायव्वो ॥ दर्शनज्ञानचारि
त्रतपउपचारिकभेदेन मोक्षविनयः पंचप्रकारो भवति सर्वचारित्रयज्ञापि विस्तरेणाथ तस्यापि विस्तरणं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शीलशिष्यानुग्रहार्थं संक्षेपतः पुनरुच्यत इति ॥ जे दव्वपज्जया खलु उवदिट्ठा जिणवरेहिं सुदणाणे । ते तह
३११ सद्दहदि णरो दंसणविणओत्ति णादव्वो ॥ ये द्रव्यपर्यायाः खलूपदिष्टा जिनवरैः श्रुतज्ञाने तांस्तथैव श्रद्दधा-
ति यो नरः स दर्शनविनय इति ज्ञातव्यो भेदोपचारादिति ॥ अथ ज्ञाने किमर्थं विनयः क्रियत इत्याशंकायामाह —
णाणी गच्छदि णाणी वंचदि णाणी णवं च णादियदि । णाणेण कुणदि चरणं तह्मा णाणे हवे
विणओ ॥ यस्माज्ज्ञानी गच्छति मोक्षं जानाति वा यस्माज्ज्ञानी वंचति परिहरति पापं यस्माच्च ज्ञानी नवं कर्म
नादत्ते यस्माच्च ज्ञानेन करोति चरणं तस्माज्ज्ञाने भवति विनयः कर्तव्य इति ॥ अथ चारित्रविनयः किमर्थं इ-
त्याशंकायामाह — पोराणयकम्मरयं चरियारित्तं करेदि जदमाणो । णवकम्मं च ण बंधदि चरित्तविणओत्ति णा-
दव्वो ॥ चिरंतनकर्मरजः चर्यया चारित्रेण रिक्तं तुच्छं करोति यतमानः स्थूयमानो नवं च कर्म न बध्नाति यस्मा-
त्तस्माच्चारित्रविनयो भवति कर्तव्य इति ज्ञातव्यः ॥ तथा तपोविनयप्रयोजनमाह — अवणयदि तवेण तमं उव- १५५
णयदि मोक्खमग्गमप्पाणं । तवविणयणियमिदमदी सो तवविणओत्ति णादव्वो ॥ इत्येवमादिगाथानां आया-
रेतीदादिगाथापर्यंतानां तपआचारार्थः प्रतिपादित इति व्याख्यानं न कृतं पुनरुक्तदोषभयादिति ॥ यतो विनयः

३१२ [illegible] तस्माद्विनयः शिक्षाफलं ॥ तम्हा सव्वपयत्तेण विणओत्तं मा कदाइ छंडिज्जो । अप्पसुदो वि य पुरिसो ख-
वेदि कम्माणि विणएण ॥ यस्मात्सर्वप्रयत्नेन विनयत्वं नो कदाचित्परिहरेद्विद्वान् यस्मादल्पश्रुतोऽपि पुरुषः
क्षपयति कर्माणि विनयेन तस्माद्विनयो न त्याज्य इति ॥ कृतिकर्मणः प्रयोजनं तद्वाचप्रस्तावायाः षष्ठमालायास्त-
दन्नोक्तं कर्तव्यं तत्कृतिकर्म यस्य प्रयुक्तं तस्योत्तरमाह — पंचमहव्वयगुत्तो संविग्गोणालसो अमाणी य । किदियं-
म्म णिज्जरट्ठी कुणइ सदा ऊणरादिणिओ ॥ पंचमहाव्रतगुप्तः पंचमहाव्रतानुष्ठानपरः संविग्नो धर्मधर्मफलयो-
र्विपुलहर्षोत्कोविलदर्शनो नालसः उद्योगवान् अमानी अपरित्यक्तमानकषायो निर्जरार्थी ऊनरात्रिकादीक्षयाल-
घुः एवं भूतः कृतिकर्म करोति सदा सर्वकालं पंचमहाव्रतयुक्तेन परलोकार्थिना विनयकर्म कर्तव्यं भवतीति सं-
बंधः कस्य तत्कृतिकर्म कर्तव्यमिति पृष्टे तस्योत्तरमाह — आयरियउवज्झायाणं पवत्तित्थेरगणधरादीणं । एदेसिं कि-
दियम्मं कादव्वं णिज्जरट्ठाए ॥ तेषामाचार्योपाध्यायप्रवर्तकस्थविरगणधरादीनां कृतिकर्म कर्तव्यं निर्जरार्थं
न मंत्रतंत्रोपकरणायेति ॥ एतत्पुनः क्रियाकर्मयोग्या इति प्रतिपादयन्नाह — णो वंदिज्ज अविरदं मादापिदुगु-
रुणरिंदतित्थं वा । देसविरददेवं वा विरदो पासत्थपणगं वा ॥ णो वंदिज्ज न वंदेत न स्तूयात् किं अविरदं अविरत-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मसंयतं मातरं जननीं पितरं जनकं गुरुं दीक्षागुरुं श्रुतगुरुमप्यसंयतं गणादिशिथिलं नरेंद्रं राजानं अन्यतीर्थि
कं पाषंडिनं वा देशविरतं श्रावकं शास्त्रादिपाठमपि देवं वा नागयक्षचंद्रसूर्यादिकं वा विरतः संयतः सन् पार्श्वस्थ
पंचकं वा ज्ञानदर्शनचारित्रशिथिलान् पंच जनान् निर्ग्रंथानपि संयतः स्नेहादिना पार्श्वस्थपंचकं न वंदेत मातरं
मसंयतं अन्यं च भयलोभादिना न स्तुयात् स्नेहलोभादिना वा नरेंद्रं न स्तुयात् भयात् पीडाभयात् वेदमोहादिकं न स्तु
यात् शास्त्रादिलोभेनान्यतीर्थिकं न स्तुयात् आहारादिनिमित्तं श्रावकं न स्तुयात् आत्मगुरुमपि विनष्टं न वंदे
त तथा वा शब्दः सूचितानन्यानपि स्वोपकारिणोऽसंयतान्न स्तुयादिति कथं पार्श्वस्थादयस्तानाह पा
सत्थाय कुसीला संसत्तोसण्णमिगचरित्ताय दंसणणाणचरित्ते अणिउत्ता मंदसंवेगा ॥ संयतगुणेभ्यः पार्श्वे
स्याम तिष्ठतीति पार्श्वस्थः वसतिकादिप्रतिबद्धो मोहबहुलो रात्रिंदिवं उपकरणानां कारकोऽसंयतजनसेवी सं
यतजनेभ्योऽदूरीभूतः कुत्सितं शीलमाचरणं स्वभावो वा यस्यासौ कुशीलः क्रोधादिकलुषितात्मा व्रतगुणशीलै १५६
श्च परिहीनः संघस्यायशः करणकुशलः सम्यक्संयतगुणेभ्यो संसक्तः संसक्तः आहारादिगृद्ध्या वैद्यमंत्रज्योति
षादिकुशलत्वेन प्रतिबद्धो राजादिसेवातत्परः उसण्णो अपगतसंज्ञोऽपगता विनष्टा संज्ञा सम्यग्ज्ञानादिकं य

स्यासावपगतसंज्ञश्चारित्राद्यपहीनो जिनवचनमजानन् चारित्रादिप्रभ्रष्टः करणालसः सांसारिकसुखमान
सः मृगस्येव चरित्रमाचरणं यस्यासौ मृगचरित्रः परित्यक्ताचार्योपदेशः स्वच्छंदगतिरेकाकी जिनसूत्रदू
षणस्तपःश्रुताद्यविनीतो धृतिरहितश्चैते पंच पार्श्वस्था दर्शनज्ञानचारित्रेषु अनियुक्ताश्चारित्राद्यनुष्ठानपरा
मंदसंवेगा नीरधर्माश्चैते दशाः सर्वदा न वंदनीया इति पुनरपि स्पष्टमवंदनायाः कारणमाह दंसणणा
णचरित्ते तववियणे णिच्चकालपासत्था एदे अवंदणिज्जा छिद्दप्पेही गुणधराणं ॥ दर्शनज्ञानचारित्रतपो
विनयेभ्यो नित्यकालं पार्श्वस्था दूरीभूताः यतोऽतस्ते न वंदनीयाः छिद्रप्रेक्षिणः सर्वकालं गुणधराणां च विशेष
विणः संयतजनस्य दोषोद्भावका यतोऽतो न वंदनीया एतत्प्रवर्तित केऽभिवंद्यंत इत्यत आह समणं वंदिज्ज मे
धावी संयदं सुसमाहिदं पंचमहव्वदकलिदं असंजमदुगुंछयं धीरं ॥ श्रमणं विरतं चारित्राद्यनुष्ठानपरं श्रव
णनिरतं श्रुतपर्वदानप्रत्ययेन किंविशिष्टं संयतं चारित्राद्यनुष्ठानतत्परं पुनरपि किंविशिष्टं सुसमाहितं ध्या
नाध्ययनतत्परं सुसमाहितं पंचमहाव्रतकलितं असंयमजुगुप्सकं प्राणेंद्रियसंयमपरं धीरं धैर्योपेतं च मा
नं एतावता शीलसद्गुणोपेतमेवंविशिष्टं स्तुयादिति तथा दंसणणाणचरित्ते तववियणे णिच्चकाल

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुंबज्ञातं एदङ्कवंदणिज्जा जेगुणावादीगुणाधराणं ॥५५॥ दर्शनज्ञानचारित्रतपोविनयेषु नित्यकालं प्रनीहन्ति
मुंपमुक्ताः सुष्ठुनिरताः ते एते वंदनीया गुणाधराणां शीलधराणां च गुणावादिनां यश्च ते वंदनीया इति संयत
३४४ पर्यवेस्थितं एतत्सु स्थानेषु च तेन वंदने त्याह वाक्खित्तपराङ्मुखं तु पमत्तंमा कदाइ वंदिज्जो आहारं च करे
तो नीहारं वा यदि करदि व्याक्षिप्तं व्याख्यानादिना व्याकुलचित्तं पराङ्मुखं पराङ्मुखं पृष्ठदेशतः प्रमत्तं नि
द्राविकथादिरतं मा कदाचिन्न वंदिज्जो ते वंदत संयतमिति संबंधः तथाहारं च कुर्वंतं तेजफलं क्रियां कुर्वाणं नी
हारं वा मूत्रपुरीषादिकं यदि करोति तदापि नो कुर्वीत वंदनां साधुः किं तर्हि कीदृशं वंद्यतां इति सोच्यते
आह आसणे आसणत्थं च उवसंतं च उवट्ठिदं अणुणविय मेधावी किदियम्मं पउंजदे आसनं विवि
क्तप्रदेशं आसनस्थं पर्यंकादिना व्यवस्थितं अथवा आसने आसनस्थं अव्याक्षिप्तं अपराङ्मुखं मुंपशांतं स्व
स्थचित्तं मुंपस्थितं वंदनां कुर्वंतीति स्थितं अनुविज्ञाप्य वंदनां करोमीति संबाधं मेधावी प्राज्ञः अनेन विधानेन कृ १८७
तिकर्म प्रारभते प्रयुङ्क्ते विदधातीत्यर्थः कथं प्रियवंतं स्वं वंदनायाः स्थानमाह आलोयणाय करणे प
डिपुच्छा पूयणाय सज्झाए अवराधे य गुरूणं वंदणमेदेसु ठाणेसु आलोचनायाः करणे आलोचनाकाले

अथवा करणे षडावश्यककाले परिप्रश्ने प्रश्नकाले पूजने पूजाकाले स्वाध्याये स्वाध्यायकाले अपराधे च का
३४५ ले अपराधकाले च गुरूणामाचार्योपाध्यायादीनां वंदनं तेषु स्थानेषु कर्त्तव्यमिति कस्मिन् स्थाने यदेतत्सूत्रेण स्था
पितं तद्व्याख्यातमिदानीं कतिवारं कृतिकर्म कर्त्तव्यमिति यत्सूत्रेण स्थापितं तद्व्याख्यानायाह चत्तारि पडि
क्कमणे किदियम्मा तिण्णि होंति सज्झाए पुव्वण्हे अवरण्हे किदियम्मा चउदस्सा होंति सामायिकस्तव
पर्यंककायोत्सर्गः अष्टाविंशतितीर्थकरस्तवपर्यंतः क्रियाकर्मेत्युच्यते प्रतिक्रमणकाले चत्वारि क्रियाक
र्माणि स्वाध्यायकाले च त्रीणि क्रियाकर्माणि भवंत्येवं पूर्वाह्णे क्रियाकर्माणि सप्त तथापराह्णे च क्रिया
कर्माणि सप्त एवं पूर्वाह्णापराह्णे च क्रियाकर्माणि चतुर्द्दश भवंतीति कथं प्रतिक्रमणे चत्वारि क्रियाकर्माणि आ
लोचनाभक्तिकरणे कायोत्सर्ग एकं क्रियाकर्म तथा प्रतिक्रमणभक्तिकरणे कायोत्सर्गो द्वितीयं क्रियाकर्म
तथा वीरभक्तिकरणे कायोत्सर्गस्तृतीयं क्रियाकर्म तथा चतुर्विंशतितीर्थकरभक्तिकरणे तदेवं कायोत्सर्गो
चतुर्थं क्रियाकर्म कथं स्वाध्याये त्रीणि क्रियाकर्माणि श्रुतभक्तिकरणे कायोत्सर्ग एकं क्रियाकर्म तथा
चार्यभक्तिकरणे द्वितीयं क्रियाकर्म तथा स्वाध्यायोपसंहारे श्रुतभक्तिकरणे कायोत्सर्गस्तृतीयं क्रियाकर्म वं

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जातिमपेक्ष्य त्रीणि क्रियाकर्माणि भवंति स्वाध्याये त्रीणि वंदनादिक्रियाकर्माणामेवं विकल्पो द्रष्टव्यः
प्रधानपदोच्चारणं कृतं यतः पूर्वाह्णादिवंदनेऽतिरिक्तं अपराह्णे रात्रौ च पि द्रष्टव्यं भेदो नास्ति अथवा पश्चिमरा
त्राउतिक्रमणे क्रियाकर्माणि चत्वारि स्वाध्याये त्रीणि वंदनायां द्वे सवितर्युदिते स्वाध्याये त्रीणि मध्याह्नवंदना
यां द्वे एवं पूर्वाह्णक्रियाकर्माणि चतुर्दश भवंति तथा अपराह्णवेलायां स्वाध्याये त्रीणि क्रियाकर्माणि प्रति
क्रमणे चत्वारि वंदनायां द्वे योगभक्तिग्रहणोपसंहारकालयोः रात्रौ प्रथमस्वाध्याये त्रीणि एवमपराह्णक्रि
याकर्माणि चतुर्दश भवंति प्रतिक्रमणस्वाध्यायकालयोरुपलक्षणत्वादिति अन्यान्यपि क्रियाकर्माणि
अत्रैवांतर्भवंति नाव्यापकत्वमिति मंदबुद्धेः पूर्वाह्णसमीपकालः पूर्वाह्ण इत्युच्यते अपराह्णसमीपः कालोऽ
पराह्ण इत्युच्यते तस्मान्न दोष इति कत्यवनतिकरणमित्यादि यत्पृष्टं तदर्थमाह   दोणदं तु जधाजादं बार
सावत्तमेव य चदुस्सिरं तिसुद्धं च किदियम्मं पउंजदे   दोणदं द्वे अवनती पंचनमस्कारादावेकावनतिः १५८
भूमिसंस्पर्शः तथा चतुर्विंशतिस्तवादौ द्वितीयावनतिः शरीरनमनं द्वे अवनती जधाजादं यथाजातं जातरूप
दार्थेषु श्रद्धायाः शैथिल्यं तत्सम्यक्त्वं कोद्रवतंडुलसदृशं यस्योदये नाप्तानाप्तागमपदार्थेषु श्रद्धा क्रमेणोत्प
द्यते तत्सम्यक्त्वमिथ्यात्वं दर्शनमोहनीयस्यापूर्वादिकरणैर्दलितस्य कोद्रवस्येव त्रिधा गतिर्भवति तत्र बं ३१५
धं प्रत्येकं सत्कर्म प्रति त्रिविधं तत्सम्यक्त्वसम्यक्त्वमिथ्यात्वस्य न बंधकारणत्वादिति षोडशकषायभेदस्वरूपं।

प्रतिपादयन्नाह कोहो माणो माया लोहोणंताणुबंधिसण्णाय अपच्चक्खाणतहा पच्चक्खाणो य संजलणो
क्रोधो रोषः संरंभः मानो गर्वः स्तब्धत्वं माया निकृतिर्वंचना अनृजुत्वं लोभो गृद्धिः अनंतान् भवान्
मिथ्यात्वासंयमस्वरूपान् अनुबंधुं शीलं येषां ते अनंतानुबंधिनस्ते च ते क्रोधमानमायालोभा अनंतानुबंधिक्रोधमान
मायालोभाः अथवा [illegible] अनुबंधं येषां [illegible] अनंतानुबंधिनः संसारापेक्षयाऽनंतकालत्वं एते सम्यक्त्व
चारित्रविरोधिनः [illegible] इति अथवानंतानुबंधिनः संज्ञा भवंति प्रत्येक इति प्रत्याख्यानं संयम ईषत्प्र
त्याख्यानं न प्रत्याख्यानं संयमासंयम इत्यर्थः अत्रावरणशब्दोऽध्याहार्यः अप्रत्याख्यानमावृण्वतीति अप्र
त्याख्यानावरणा प्रत्याख्यानं संयममावृण्वंतीति प्रत्याख्यानावरणा अथवा येषु सत्सु प्रत्याख्यानं संयमासं
यमादिरहितसम्यक्त्वं भवति ते अप्रत्याख्यानसंज्ञाः क्रोधमानमायालोभाः तादर्थ्यात्ताच्छब्द्यमिति तथा येषु
सत्सु प्रत्याख्यानमसम्यक्त्वमादिमसंयमासंयमो भवति क्रोधमानमायालोभाः प्रत्याख्यानसंज्ञा भवंत्युपचारापि ता
दर्थ्यात्ताच्छब्द्यमिति तथा संयमेन समं [illegible] ज्वलन्तीति संयमो वा ज्वलत्येषु सत्स्विति वा संज्वलन क्रोधमानमा
यालोभा इति आद्या सम्यक्त्वसंयमघातिन द्वितीया देशसंयमघातिनस्तृतीयादयः संयमघातिनश्चतुर्थाय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पारम्मातसंयमघातिनइति नोकषायवेदानुवतिपादयन्नाह इत्थीपुरिसणउंसयवेदा हासरदिअरदि
सोगभय जयसोगायडगुंछा णवविहतदणोकसायं स्त्रियातिच्छादयति दोषैरात्मानंपरं चस्त्री पुरुषः प्र
कृष्टकर्मणिज्ञानउ्रमादयति तानिकरोतीतिवापुरुषः नपुमान्नस्त्रीनपुंसकं येषांपुद्गलस्कंधानामुदयेन
पुरुषेच्छाकांक्षाउत्पद्यते एतेषांस्त्रीवेदइतिसंज्ञा येषांउदयेनपुद्गलस्कंधानांवनितायामाकांक्षाजायतेतेषां
६४१ वेदइतिसंज्ञापुवेदइतिसंज्ञा येषांचपुद्गलस्कंधानामुदयेनइष्टकाग्निसदृशानद्वयोराकांक्षाजायते तेषांनपुं
सकवेदइतिसंज्ञा हसनंहासः यस्यकर्मस्कंधस्योदयेनहास्यनिमित्तोजीवस्यरागउत्पद्यते तस्यहास्यइति
संज्ञाकारणकार्योपचारात् रमणंरतिः रम्यतेःनयतिक्रुत्सितरम्यतनयेतिवारतिर्येषांकर्मस्कंधानामुदयेनद्रव्य
क्षेत्रकालभावेषुरतिरुत्पद्यते तेषांरतिरितिसंज्ञा नरमतेनरम्यतेवायया सा अरतिर्यस्य पुद्गलस्कंधस्योदयेन ५७५५२
द्रव्यादिष्वरतिर्जायतेतस्यारतिरितिसंज्ञा शोचनंशोचयतीतिवाशोकः समुत्पद्यतेजीवस्यतस्यशोकइति ३४५
संज्ञा भीतिर्यस्मादित्तिभयंयेः कर्मस्कंधरुदयमागतैर्जीवस्यभयमुत्पद्यते तेषांभयमितिसंज्ञा जुगुप्सनं
जुगुप्सा येषांकर्मस्कंधानामुदयेनद्रव्यादिषुजुगुप्साजायतेतस्यजुगुप्साइतिसंज्ञा एवंनवविधमवनोक

षायवेदनीयंज्ञातव्यमितिकषायवेदनीयास्यभेदाःर्द्धमेतस्माच्चागमाज्ज्ञातव्यंनवविधमिति आयुषःनाम्नश्च
प्रकृतिभेदान्प्रतिपादयन्नाह णिरयाऊतिरियाऊ माणुसदेवाणहोंतिआऊणि गदिजादिसरीराणि
य बंधणसंघादसंठाणा नारकादिषुसंबंधस्तेनायुषालेदव्यपदेशः क्रियते नरकेषुलवंनारकायुः ति
र्यक्षुलवंतिरश्चायुः मनुष्येषुलवंमनुष्यायुः देवेषुलवंदेवायुएवमायूंषिचत्वारियेषांकर्मस्कंधानामुदयेनजी
६४२ वस्याधोगतिस्वभावेषुनरकेषुतीव्रशीतोष्णवेदनेषुदीर्घजीवनेनावस्थानंलवति तेषांनारकायुरितिसंज्ञा येषां
पुद्गलस्कंधानामुदयेनतिर्यग्मनुष्यदेवलावानामवस्थानंलवति तेषांतरश्चमानुषदेवायूंषीतिसंज्ञाइति गतिर्ल
वःसंसारःयदुदयादात्मालवांतरंगच्छति सागतिर्यदिगतिनामकर्मतस्यादगतिर्जीवःस्यात्यस्मिन्जीवलाव
सत्यायुःकर्मणोयथावस्थानंशरीरादीनिकर्माणिउदयंगच्छंतिसतालवायस्यपुद्गलस्कंधस्यमिथ्यात्वादि
कारणैःआसकर्मणउदयाल्लवतितस्यगतिरितिसंज्ञासाचचतुर्विधा नरकगतिः तिर्यग्गतिः मनुष्यगतिः देवगतिश्च
ति येषांकर्मस्कंधानामुदयात् आत्मनोनारकादिलावस्तेषांनरकगत्यादयःसंज्ञाश्चतस्रोलवंतिनरकादिगति
षुअव्यभिचारिणासादृश्येनेकीकृतात्मजातिर्जीवानांसादृश्यःसपरिणामः यदिजातिनामकर्मतःस्यात्मकु

Ganesh Varni Digambar Jain Institute, Narja, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

…नाम कुंथ्वादि त्रीन्द्रियाः भ्रमरादिकाः चतुरिन्द्रियाः मनुष्यादि पंचेन्द्रियाः… द्वयोर्द्वीन्द्रियादीनि: समानानां जातिरेव तद्रूपं तस्मात् यतः कर्मस्कंधात् जाति
साद्दृश्यं तस्मात् यतः कर्मस्कंधात् जातिसाद्दृश्यं तस्य जातिरिति संज्ञा सा च पंचविधा एकेन्द्रिय द्वीन्द्रिय त्रीन्द्रिय
चतुरिन्द्रिय पंचेन्द्रिय जातिभेदेन यदुदयादात्मा एकेन्द्रियजातिनाम एवं शेषेष्वपि योज्यं यदुदयादात्मनः शरी
रनिर्वृत्तिस्तच्छरीरनाम यस्य कर्मस्कंधस्योदयेनाहारतैजसकार्मणवर्गणापुद्गलस्कंधाः शरीरयोग्यपरिणामैः
परिणता जीवेन संबध्यंते तस्मात् शरीरमिति संज्ञा यदि शरीरनामकर्म न स्यात् आत्मा विमुक्तः स्यात् तत्पंचविधं
औदारिकवैक्रियिकाहारकतैजसकार्मणशरीरभेदेन यदुदयादाहारवर्गणागतपुद्गलस्कंधा जीवगृहीताः
…औदारिकशरीरं भवति तदौदारिकशरीरनाम एवं सर्वत्र यदुदयादाहारवर्ग
णागतपुद्गलस्कंधाः सर्वांगावयवाहारकशरीरस्वरूपेण परिणमंति तदाहारकशरीरनाम तथा यदुदयात्तैजसवर्ग
णापुद्गलस्कंधा निःसरणानिःसरणात्मकप्रशस्ताप्रशस्तात्मकशरीरस्वरूपेण भवंति तत्तैजसशरीरनाम त 220
था यदुदयादाहारवर्गणागतपुद्गलस्कंधा अणिमादिगुणोपलक्षितं वैक्रियिकं शरीरं स्यात्तद्वैक्रियिकं या तृतीयं पत्रं
…ङ्गोपांगफलं तत्सर्वकर्माश्रयत्वात् तत्कार्मणशरीरं यथागतपुद्गलस्कंधानां जीवसंबंधानां यः पुद्गल

…शरीरोदयवशात् अन्योन्यसंश्लेषणसंबंधो भवति तच्छरीरबंधननाम यदि शरीरनामकर्म न स्यात् वालुकाकृतपुरुष
…शरीरं स्यात् तदौदारिकशरीरबंधनादिभेदेन पंचविधं यदुदयादौदारिकादिशरीराणां विवरविरहिता
अन्योन्यप्रवेशानुप्रवेशेन एकत्वापादानं भवति तत्संघातनाम यदि संघातनाम न स्यात् तिलमोदकवत् जीवशरीरं
स्यात् तदौदारिकशरीरसंघातादिभेदेन पंचविधं यदौदारिकादिशरीराकृतिनिर्वृत्तिर्भवति तत्संस्थाननाम
यस्य कर्मस्कंधस्योदयेन जातिकर्मोदयपरतंत्रशरीरस्य संस्थानं क्रियते तच्छरीरसंस्थानं यदि तन्न स्यात् जीव
शरीरं संस्थानं स्यात् तत्षोढा विभज्यते समचतुरस्रसंस्थाननाम न्यग्रोधपरिमंडलसंस्थाननाम सातिशरीरसं
स्थाननाम वामनसंस्थाननाम कुब्जसंस्थाननाम हुंडसंस्थाननाम चेति समचतुरस्रं समविभक्तमित्यर्थः न्यग्रो
धो वटस्तस्य परिमंडलमिव परिमंडलं यस्य तत् न्यग्रोधपरिमंडलं नाभेरूर्ध्वसर्वावयवपरमाणुबहुत्वं न्यग्रोधपरिमं
डलं यच्छरीरसंस्थानं न्यग्रोधपरिमंडलशरीरसंस्थानं आयतवृत्तमित्यर्थः साति वल्मीकं शाल्मलिर्वा तस्य संस्था
नमिव संस्थानं यस्य तत् साति शरीरसंस्थानं नाभेरधोऽवयवविशालत्वं कुब्जस्य शरीरं तस्य संस्थानमिव संस्था
नं यस्य तत्कुब्जशरीरसंस्थानं यस्योदयेन शाखायां दीर्घत्वं मध्यस्य ह्रस्वत्वं भवति तत्कुब्जशरीरसंस्थाननाम वा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्नमध्यशरीरं वामनशरीरं तस्य संस्थानं नाम यस्योदयात् शाखानां हस्वत्वं कायस्य च दीर्घत्वं भवति विषमपाषाणस्त
द. तिरिव विषमं हुंडं यस्य शरीरं तस्य संस्थानमिव संस्थानं यस्य तत् हुंडशरीरसंस्थानं यस्योदयेन सर्वांगोपांग.
संस्थानस्यास्पष्टीनत्वं संस्थानं भवति अथ बंधनसंघातसंस्थानानां को भेद इति चेत् नैष दोषः यस्य कर्मणा उद.
येनौदारिकशरीरपरमाणवः अन्योन्यं बंधमागच्छंति तदौदारिकसंबंधनं नाम यस्य कर्मण उदयेनौदारिकशरी
रस्कंधानां शरीरभावमुपगतानां बंधननामकर्मोदयेन कृतबंधनबद्धानां मात्रं मर्त्यं भवति तदौदारिकशरीरसंघातं ना
९०५ म यस्य च कर्मण उदयेन शरीरस्कंधानामाकृतिर्भवति तत्संस्थानमिति मदाहत्तदायतएवं सर्वत्र द्रष्टव्यमिति
तथा संघयणं गोवंगं वण्णरसगंधफासमणुपुव्वी अगुरुगलहुगउवघाद परघादमुस्सासणामं च
यस्योदयादस्थिसंधिबंधविशेषो भवति तत्संहनननाम एतस्माभावे शरीरसंहननं किं भवेत् तत्षड्विधं च वज्र
ऋषभनाराचसंहननं वज्रनाराचसंहननं नाराचसंहननं अर्द्धनाराचसंहननं कीलिकासंहननं असंप्राप्तसृ
पाटिकासंहननं चेति संहननमस्थिसंचयं ऋषभो वेष्टनं वज्रवत् अभेद्यत्वात् ऋषभवत् नाराचवत् वज्रनाराचौ ३२१
तौ द्वावपि यस्मिन् शरीरसंहनने तत् वज्रऋषभनाराचशरीरसंहननं यस्य कर्मण उदयेन वज्रास्थीनि वज्रवे

ष्टनेन वेष्टितानि वज्रनाराचेन च कीलितानि भवंति एषएवास्थिबंधो वज्रऋषभरहितो यदुदयेन भवति द्वितीयं यस्यक
र्मण उदयेन वज्रविशेषणरहितं अस्थिसंधिबंधानाराचकीलिता भवति तत्तृतीयं यस्य कर्मण उदये अस्थिसं
चयो नाराचेनार्द्धकीलितः तच्चतुर्थं यस्य कर्मण उदयेन वज्रास्थीनि वज्रवेष्टनेन वेष्टितानि वज्रनाराचेन च कीलित
नि भवंति तत्पंचमं यस्य कर्मण उदयेनान्योन्यमसंप्राप्तानि असंख्यातासृपाटिकावदस्थिराबद्धानि भवंति तत्षष्ठमिति
६४ यदुदयादंगोपांगनाम यस्योदयेन कर्मणः नलकबाहूरूदरनितंबाः पृष्ठशिरोरस्पृष्ठावंगानि उपांगानि च पृष्ठकर्ण
राटिमस्तकललाटशंखकर्णनासिकानयनाक्षिकूपहनुकपोलाधरोष्ठसृक्कतालुजिह्वाग्रीवास्तनचुचुकांगु
ल्यादीनि भवंति तदंगोपांगं त्रिविधं औदारिकशरीरांगोपांगं वैक्रियकशरीरांगोपांगं आहारकशरीरांगोपांगं
चेति यस्य कर्मण उदयेनौदारिकांगोपांगानि भवंति तदौदारिकांगोपांगं नाम एवमन्यत्रापि यदुदयाच्छरीरवर्ण
विभागनिष्पत्तिस्तद्वर्णनामास्यात् तदभावे अवर्णशरीरं स्यात् तत्पंचविधं शुक्लवर्णनाम रक्तवर्णनाम हरिद्रवर्ण
नाम कृष्णवर्णनाम हरितवर्णनाम च इति यस्य कर्मण उदयेन शरीरपुद्गलानां शुक्लवर्णता भवति तच्छुक्लवर्णनाम
एवं शेषाणामपि द्रष्टव्यं यस्य कर्मस्कंधस्योदयात् जीवशरीरे जातिप्रतिनियततिक्तादिरसो भवति तद्रसनामेति संज्ञा एत

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्य कर्म्मस्कंधस्योदयाज्जातिप्रतिनियतो रसो भवति न चैवं निंबादीनां प्रतिनियतरसोपलंभात् तत्पंचविधं तिक्तनाम
कटुकनाम कषायनाम अम्लनाम मधुरनाम चेति यस्य कर्म्मण उदयेन शरीरपुद्गलानां तिक्तरसस्वरूपेण परि
णमंति तत्तिक्तनाम एवं शेषाणामप्यर्थो वाच्य इति यस्य कर्म्मस्कंधस्योदयेन जीवशरीरे जातिप्रतिनियतो गंधउ
त्पद्यते तस्य गंध इति संज्ञा न च तस्याभावात् कस्तूर्यादिषु प्रतिनियतगंधोपलंभात् तद्द्विविधं सुरभिगंधिनाम दुर
६४६ भिगंधनाम तत्र यस्य कर्म्मस्कंधस्योदयेन शरीरपुद्गलाः सुरभिगंधा भवंति तत्सुरभिगंधनाम यस्य कर्म्मस्कंध
स्योदयेन शरीरपुद्गला दुर्गंधा भवंति तद्दुर्गंधनामेति यस्य कर्म्मस्कंधस्योदयेन जीवशरीरे जातिप्रतिनियतस्पर्श
उत्पद्यते तत्स्पर्शनाम न चैतस्याभावात् सर्पोत्पलकमलादिषु प्रतिनियतस्पर्शनदर्शनात् तदष्टविधं कर्कश
नाम मृदुनाम गुरुनाम लघुनाम स्निग्धनाम रूक्षनाम शीतनाम उष्णनाम चेति यस्य कर्म्म स्कंधस्योदयेन शरीरपुद्
गलानां कर्कशभावो भवति तत्कर्कशनाम एवं शेषस्पर्शनामार्थो वाच्यः आनुपूर्व्यं पानुपूर्व्यं पूर्वापरशरीरयोरंतरा। ३२२
लायकाद्वित्रिसमयेषु वर्त्तमानजीवस्य यस्य कर्म्मस्कंधस्योदयेन जीवप्रदेशानां विशिष्टसंस्थानविशेषो भवति त
दानुपूर्व्यनाम न च तस्याभावो विग्रहगतौ जातिप्रतिनियतसंस्थानोपलंभात् पूर्वशरीरपरित्यागे प्रतिगमनोपलंभा

त्तच्चतुर्विधं नरकगतिप्रायोग्यानुपूर्व्यं तिर्यग्गतिप्रायोग्यानुपूर्व्यं मनुष्यगतिप्रायोग्यानुपूर्व्यं देवगतिप्रायोग्यानु
पूर्व्यं चेति यस्य कर्म्मस्कंधस्योदयेन नरकगतिं गतस्य जीवस्य विग्रहगतौ वर्त्तमानस्य नरकगतिप्रायोग्यसंस्थानं
भवति तन्नरकगतिप्रायोग्यानुपूर्व्यं नाम एवं शेषाणामप्यर्थो वाच्य इति यस्य कर्म्मस्कंधस्योदयाज्जीवानंताऽनं
त पुद्गलाय : सर्व्व : अयः पिंडवद्गुरुत्वान्नाधः पतति न चार्कतूलवल्लघुत्वादूर्ध्वं गच्छति तदगुरुलघुनाम उपघ
६४८ घात उपघातः यस्योदयात्स्वयंकृतोद्बंधनमरुत्पतनादिनिमित्त उपघातो भवति तदुपघातनाम अथवा यत्कर्म
जीवस्य स्वपीडाहेतूनवयवान् महाशृंगलंबस्तनतुंदादीन् करोति तदुपघातं परेषां घातः परघातः यस्य कर्म्मण
उदयात् परघातहेतवः शरीरपुद्गला सर्प्पदंष्ट्रावृश्चिकपुच्छादिषु वा परशस्त्राद्याघाता वा भवंति तत्परघातं उच्छ्वसन
मुच्छ्वासः यस्य कर्म्मण उदयेन जीव उच्छ्वासनिःश्वासकार्योत्पादनसमर्थः स्यात् तदुच्छ्वासनाम उक्तं च नामशेषः सर्वत्रा
भिसंबध्यत इति तथा आयवउज्जोवविहायगइ जुयलतसयसुज्जमणामं च पज्जत्तयसाहारण थिरसुभ
दसुभगं च आदज्ज सुस्सरजसकित्ती विय णिमिणं तित्थयरणाम बादाल आतपनमातापः यस्य कर्म्मस्कं
धोदयेन जीवशरीरे आतपो भवति तदातपनाम न च तस्याभावः सूर्यमंडलादिषु पृथिवीकायिकातापोपलंभात् तद्यो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0. In Public Domain. Digitized by Sarayu Trust/eGangotri

तनं उद्योतः यस्य कर्मस्कंधस्योदयात् जीवशरीरे उद्योत उत्पद्यते तदुद्योतनाम न चास्याभावः चंद्रनक्षत्रादिमंड
लेषु खद्योतादिषु च पृथ्वीकायिकशरीरेषु उद्योतदर्शनात् विहायो आकाशं विहायसि गतिर्येषां कर्मस्कं
धानामुदयेन जीवस्याकाशगमनं भवति तद्विहायोगतिनाम न चास्याभावः वितस्तिमात्रपादजीवप्रदेशान् भूमिमव
गाह्य सकलजीवप्रदेशानामाकाशे गमनोपलंभात् तद्द्विविधं प्रशस्तविहायोगतिनामा अप्रशस्तविहायोगति
६४५ नाम यस्य कर्मणः उदयेन सिंहकुंजरहंसादीनामिव प्रशस्ता गतिर्भवति तत्प्रशस्तविहायोगतिनाम यस्य कर्म
णः उदयेन उष्ट्रशृगालश्वादीनामिवाप्रशस्ता गतिर्भवति तदप्रशस्तविहायोगतिनाम यस्य कर्मण उदयेन।
जीवः स्थावरेषूत्पद्यते तत्स्थावरनाम न चैवं स्यात् यस्य कर्मण उदयात् अन्यबाधाकरशरीरेषु बादरेषूत्पद्यते तज्जी
वस्य बादरनाम अन्यथा शक्तिहतशरीराजीवाः स्युः यस्य कर्मण उदयेन सूक्ष्मेषूत्पद्यते तत्सूक्ष्मशरीरनिर्वर्त्तकं वा
यस्योदयादाहारादिषु षट्पर्याप्तिनिर्वृत्तिस्तत्पर्याप्तिनाम तत्षड्विधं तद्यथा शरीरनामकर्मोदयात् पुद्गलवि ३२३
पाकिन आहारवर्गणागतपुद्गलस्कंधाः समवेतानंतपरमाणुनिष्पादिता आत्मावष्टब्धक्षेत्रस्थाः कर्मस्कंधसंबं
धतो मूर्तीभूतमात्मानं समवेतत्वेन समाश्रयंति तेषामागतानां पुद्गलस्कंधानां खलरसपर्याये परिणमनशक्तिरा

हारपर्याप्तिः साचनांतर्मुहूर्त्तमंतरेण समयेनैकेन जायते शरीरोपादानात् प्रथमसमयादारभ्यांतर्मुहूर्त्तेनाहारपर्या
प्तिर्निष्पाद्यते खलभागं तिलखलोपममस्थ्यादिस्थिरावयवैस्तिलतैलसमानं रसभागं रसरुधिरवसाशुक्रादिद्रवावयवैः
६४० परिणमनशक्तेर्निष्पन्नशरीरपर्याप्तिः साहारपर्याप्तेः पश्चादंतर्मुहूर्त्तेन निष्पाद्यते योग्यदेशस्थितयोग्यदेशस्थित
रूपादिविशिष्टार्थग्रहणशक्तेर्निष्पत्तिरिंद्रियपर्याप्तिः सापि ततः पश्चादंतर्मुहूर्त्तादुपजायते न चेंद्रियनिष्पत्तावस्था
यामपि तस्मिन् क्षणे बाह्यार्थविषयज्ञानमुत्पद्यते तदुपकरणाभावात् उच्छ्वासनिःसारणशक्तेर्निष्पत्तिरानपानपर्या।
प्तिः सापि तस्मादंतर्मुहूर्त्तकालसमतीतिर्भवति भाषावर्गणायाः स्कंधान् चतुर्विधभाषाकारेण परिणमनश।
क्तेः परिसमाप्तिर्भाषापर्याप्तिः एषापि पश्चादंतर्मुहूर्त्तादुपजायते मनोवर्गणाभिर्निष्पन्नद्रव्यमनोवष्टंभेनानु।
भूतार्थस्मरणशक्तेरुत्पत्तिः एतासां शरीरनाम्नः कर्मणः जन्मसमयादारभ्य तासां सत्त्वात् उपगमात् निष्पत्तिस्तु पुनः क्रम
णः एतासां निष्पत्तिरपर्याप्तिर्न च पर्याप्तिप्राणयोरभेदः यत आहारादिशक्तीनां निष्पत्तिः पर्याप्तिः प्राणिन्त्यैरात्म
ति प्राणाः षड्विधपर्याप्तिर्यस्य कर्मणस्तत्पर्याप्तिनाम शरीरनामकर्मोदयाच्छरीरनामकर्मोदयान्निर्वर्त्यमानं शरीर।
मेकात्मोपभोगकारणं यतो भवति तत्प्रत्येकशरीरनाम बहूनामुपभोगहेतुत्वेन साधारणशरीरं यतो भवति तत्सा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षणशरीरनाम यस्य कर्मण उदयात् रसरुधिरमेदोमज्जास्थिमांसशुक्राणां सप्तधातूनां स्थिरत्वं भवति तत् स्थिरनाम
यदुदयात् एतेषामस्थिरत्वं उत्तरोत्तरपरिणामः भवति तदस्थिरनाम यदुदयात् अंगोपांगनामकर्मजनितानामंगानामुपांगा
नां च रमणीयत्वं शुभनाम तद्विपरीतमशुभनाम यदुदयात् स्त्रीपुंसयोरन्योन्यप्रीतिप्रभवसौभाग्यं भवति तत् सुभगनाम
यदुदयात् रूपादिगुणोपेतोपि अप्रीतिकरस्तत् दुर्भगनाम वशाह्वः समुज्ज्यार्थः यस्य कर्मण उदयेनादेयत्वं प्रभोपेत
६४१ शरीरं भवति तदादेयनाम यदुदयात् अनादेयत्वं निःप्रभशरीरत्वं तदनादेयनाम अथवा यदुदयादादेयवाक्यमनादे
यवाक्यं भवति तदादेयमनादेयमिति शालनस्वरः सुस्वरः मधुरस्वरः यस्योदयात् सुस्वरत्वं मनोज्ञस्वरनिर्वर्तनं भ
वति तत् सुस्वरनाम यदुदयात् दुःस्वरता अमनोज्ञस्वरनिर्वर्तनं तद् दुःस्वरनाम पुण्यगुणख्यापनकारणं यशःकी
र्तिनाम अथवा यस्य कर्मण उदयात् सद्भूतानामसद्भूतानां च ख्यापनं भवति तत् यशःकीर्तिनाम यदुदयात् सद्भू
तानामसद्भूतानां चापि गुणानां ख्यापनं तदयशःकीर्तिनाम नियतं मानं तद् द्विविधं प्रमाणनिर्माणं स्थाननिर्माणं चेति य ३२४
स्य कर्मण उदयेन द्व्यपि निर्माणं भवति तत् निर्माणनाम अन्यथा कर्मनयननासिकादीनां स्वजातिप्रतिरूपाणामा
त्मनः स्थाने स्थाने प्रमाणेन च नियमनं स्यात् यस्य कर्मण उदयेन परमार्हन्त्यं त्रैलोक्यपूजाहेतुर्भवति तत्परमोत्कृष्टं

तीर्थंकरनाम इत्येवं पिंडप्रकृतीनां द्वाचत्वारिंशन्नाम्न एकैकापेक्षया त्रिनवतिर्भवतीति गोत्रप्रकृतिभेदमंतरायप्रकृ
तिभेदं चाह उच्चानीचागोदं दाणंलाहं तरायभोगोय परिभोगवीरियं चेव अंतरायं च पंचविहं गो॰
६४२ शाष्टः उत्पन्नकर्मनि संबध्यते उच्चैर्गोत्रं नीचैर्गोत्रं द्विविधं यदुदयात् लोकपूजितेषु कुलेषु जन्म तदुच्चैर्गोत्रं यदुदयात्
गर्हितेषु कुलेषु जन्म तन्नीचैर्गोत्रं अंतरायशब्दः प्रत्येकमभिसंबध्यते काकाक्षिवद्दोलयत्र श्रुतपदार्थस्वस्या
भिर्दानं तस्यांतरायः दानोदयादीनामंतरं दानांतरायः लाभसमीप्सितवस्तुनः तस्यांतरायः लाभांतरायः सकृद्भुज्यं
भोगस्तस्यांतरायः भोगांतरायः पुनर्भुज्यते परिभोगस्तस्यांतरायः परिभोगांतरायः वीर्यशक्तिरुत्साहस्तस्यांतरायो
वीर्यांतरायः दानादिपरिणामव्याघातहेतुत्वाद्व्यपदेशः यदुदयाद्दातुकामोपि न प्रयच्छति लब्धुकामोपि न लभते
भुक्तमिच्छन्नपि न भुंक्ते उपभोक्तुमभिवांछन्नपि न परिभुंक्ते उत्सहितुकामोपि नोत्सहते इत्येवमंतरायः पंचविधः उत्त
रप्रकृतिभेदेनैवमुत्तरप्रकृतिभेदाष्टचत्वारिंशच्छतं भवति प्रकृतिस्वामित्वं प्रतिपादयन्नाह सद्देमिच्छादिठी बंध
दिमाहारतिझ्यरं अष्टचत्वारिंश-च्छतमध्ये शतं विंशत्युत्तरं बंधप्रकृतयो भवंति अष्टाविंशतिरबंधप्रकृ
तयः पंचशरीरबंधनानि पंचशरीरसंघातानि चत्वारो वर्णाश्चत्वारो रसा एको गंधः सप्तस्पर्शाः सम्यक्त्वसम्यग्मिथ्यात्वे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शेषत्येवमष्टाविंशतिः एतान्यः शेषाणां प्रकृतीनां प्रागाहारकद्वयतीर्थकररहितानां सप्तदशाधिकं शतं मिथ्यादृष्टिर्ब
ध्नाति एतासां मिथ्यादृष्टिस्वामी। ति तीर्थकरसम्यक्त्वनाहारकद्वयं यमनातो न मिथ्यादृष्टिर्बध्नाति आहारांगोपांग
तीर्थकरनामानीति सासादनादीनां बंधप्रकृतीः प्रतिपादयन्नाह वज्जियतदालीसं तेवण्णंचउवण्णंच बं
धइसम्मादिट्ठीदु सावदसंजदो तदो चेव पंचाद्रनस्त्रहिताः सासादनसम्यग्मिथ्यादृष्ट्योर्बंधप्रकृतीस्तावद्वि
रूपयामः मिथ्यात्वनपुंसकवेदनरकायुर्नरकगत्येकद्वित्रिचतुरिन्द्रियजातिहुंडसंस्थानासंप्राप्तसृपाटिकासंह
ननरकगतिप्रायोग्यानुपूर्व्यातपस्थावरसूक्ष्मापर्याप्तकसाधारणशरीरसंज्ञकाः षोडशप्रकृतीस्त्यक्त्वा शेषामि
थ्यादृष्टिबंधप्रकृतीः एकाधिकशतं सासादनसम्यग्दृष्टिर्बध्नातीति सम्यग्मिथ्यादृष्टिः सम्यग्दृष्टिर्बंधप्रकृतीः तीर्थक
रद्वयमनुष्यायुर्रहिताश्चतुःसप्ततिसंख्या बध्नाति निद्रानिद्राप्रचलाप्रचलास्त्यानगृद्धि अनंतानुबंधिक्रोधमान
मायालोभस्त्रीवेदतिर्यगायुस्तिर्यग्गतिमध्यमचतुःसंस्थानमध्यमचतुःसंहननतिर्यग्गतिप्रायोग्यानुपूर्व्योद्योताःप्र २२५
शस्तविहायोगतिदुर्भगदुःस्वरानादेयनीचैर्गोत्रसंज्ञकाः पंचविंशतिः प्रकृतीः परित्यज्य तीर्थकरसहिताः सासा
दनबंधप्रकृती। वा सप्तसप्ततिप्रकृतीः असंयतसम्यग्दृष्टिर्बध्नाति अप्रत्याख्यानावरणक्रोधमानमायालोभमनु

ष्यायुरौदारिकशरीरमंगोपांगवज्रऋषभनाराचसंहननमनुष्यगतिप्रायोग्यानुपूर्व्यनामादिदश प्रकृती।
परित्यज्य शेषा असंयतसम्यग्दृष्टिर्बंधप्रकृती। स्त्रिपंचाशद्रहिततीर्थकराहारकद्वयसहितमिथ्यादृष्टिबंधप्रकृती
र्वा सप्तषष्टिसंज्ञकाः संयतासंयतो बध्नाति प्रत्याख्यानावरणक्रोधमानमायालोभसंज्ञकाश्चतस्रः प्रकृतीः परि
त्यज्य शेषाः संयतासंयतबंधप्रकृतीः पंचपंचाशद्रहितमिथ्यादृष्टिबंधप्रकृतीर्वा तीर्थकराहारकद्वयबंधसहि
ताः पंचषष्टिप्रकृतीः प्रमत्तसंयतो बध्नाति तथा तेनैव प्रकारेण प्रमत्तादीनां बंधप्रकृतयो द्रष्टव्या स्तद्यथा सद्व
द्यारतिशोकास्थिराशुभायशःकीर्तिसंज्ञकाः षट्प्रकृतीः परित्यज्य शेषाः अप्रमत्तबंधकाः सदेवायुःप्रकृतीः अ
ष्टापंचाशत्संज्ञकाः अपूर्वकरणो बध्नाति आद्यभागे तत एव निद्राप्रचलारहिताः षट्पंचाशत्प्रकृतीः स एवा
पूर्वकरणः संख्यातभागे बध्नाति ततऊर्ध्वं संख्येयभागे पंचेन्द्रियजातिवैक्रियिकाहारकतैजसकार्मणशरीर
समचतुरस्रसंस्थानवैक्रियिकाहारकशरीरांगोपांगवर्णगंधरसस्पर्शदेवगतिप्रायोग्यानुपूर्व्यागुरुलघूपघातपर
घातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तकप्रत्येकशरीरस्थिरशुभसुभगसुस्वरादेयनिर्माणतीर्थकराख्याः प्रकृ
तीः परित्यज्य शेषाः षड्विंशतिप्रकृतीः स एवापूर्वकरणो बध्नाति ततः अनिवृत्तिप्रथमभागे एव प्रहीणहास्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रतिभयजुगुप्सारहितां द्वाविंशतिसंख्यां बध्नाति अनिवृत्तिबादरस्ततऊर्द्धं पुंवेदरहितामेकविंशतिप्रकृतीः अनि
वृत्तिद्वितीयभागे बध्नाति ततः क्रोधरहितां विंशतिप्रकृतीः पंचमभागे बध्नाति ततऊर्द्धं तामेव लोभरहितां सप्तदशप्र
कृतीः सूक्ष्मसांपरायो बध्नाति ज्ञानांतरायदशकं दर्शनचतुष्टयं उच्चैर्गोत्रयशःकीर्त्तिश्च षोडशप्रकृतीः सूक्ष्मसांपरायो ब
ध्नाति ज्ञानांतरायदशकं दर्शनचतुष्टयं उच्चैर्गोत्रयशःकीर्त्तिश्च षोडशप्रकृतीः सूक्ष्मसांपरायो बध्नाति ततऊर्द्ध सातवेद
नीयाख्यामेकां प्रकृतिं उपशांतकषायः सयोगकेवली बध्नाति अयोगकेवली अबंधकेन किंचित्कर्म्म बध्नाती
ति ख्यातप्रकृतिबंधविकल्प इदानीं स्थितिबंधविकल्पो वक्तव्यः सा च स्थितिर्द्विधा उत्कृष्टा जघन्या च तत्रयासां
कर्म्मप्रकृतीनां उत्कृष्टा स्थितिः समाना तां निर्द्देशार्थमुच्यते तिण्हं खलु पढमाणं उक्कस्सं अंतरायस्सेव तीसं को
डाकोडी सायरणामाणमेवठिदी त्रयाणां प्रथमानां ज्ञानावरणदर्शनावरणवेदनीयानां समीपात् सादचर्या
द्वा मर्वपां प्रथमत्वे अंतरायस्य च उत्कृष्टा स्थितिः सागरनाम्नां त्रिंशत्कोटीकोट्यः एवनाधिकाः पंचानां ज्ञानावरणी ३३६
यानां दर्शनावरणवेदनीयानां समीपात् सादचर्याद्वा सर्वेषां प्रथमत्वे अंतरायस्य च उत्कृष्टा स्थितिः सागरनाम्नां त्रिं
शत्कोटीकोट्य एवनाधिकाः पंचानां ज्ञानावरणीयानां नवानां दर्शनावरणीयानां असातवेदनीयस्य पंचांतराया

णां उत्कृष्टस्थितिबंधः स्फुटं त्रिंशत्सागरोपमकोटीकोट्य इति कर्म्मरूपमुदयलाएतावता कालेन कर्म्मस्वरूपाला व
रूपमुपढजंतीति मोहस्स सत्तरिं खलु वीसं णामस्स च वगोदस्स तेत्तीसमाउगाणं उवमाउसायराणंतु
मोहस्य मि ः गात्रस्य सागरोपमानां कोटाकोटीनां सप्ततिरुत्कृष्टा स्थितिर्नाम गोत्रयोः कर्म्मणोः उत्कृष्टा स्थितिः सागरा
णां कोटाकोटीनां विंशतिः पूर्वोक्तेन सागरनाम्ना कोटाकोटीइत्यनेन संबंधः आयुषः उनः कोटाकोटीशब्देनाभिसं
बंधः तथा प्रनर्तिसवता दागमे इत्यतः सागरशब्देन वसं बंधः कृतः पुनः सागरोपमग्रहणात् अत्र आयुष उत्कृष्टा स्थितिः उपमा
सागराणां त्रयस्त्रिंशत् स्थितसागरस्य कस्य कर्माणि उपमा उशाह सर्व विशेषसंग्रहार्थस्तथा सातवेदनीयस्त्रीवेदमनुष्यग
तिप्रायोग्यानुपूर्व्यनाम्नां उत्कृष्टा स्थितिः एवं दशसागरोपमकोटीकोट्यः षोडशकषायाणां उत्कृष्टः स्थितिसंबंधः चत्वारिं
शत्कोटीकोट्यः सागराणां पुंवेदहास्यरतिदेवगतिसमचतुरस्रसंस्थानवज्रऋषभनाराचसंहननदेवगतिप्रायोग्या
नुपूर्व्यप्रशस्तविहायोगतिस्थिरशुभसुभगसुस्वरादेययशःकीर्त्तिउच्चैर्गोत्राणां उत्कृष्टः स्थितिबंधः दशसागरोप
मकोटीकोट्यः नपुंसकवेदारतिशोकभयजुगुप्सानरकगतितिर्यग्गतिएकेंद्रियपंचेंद्रियजातिऔदारिकवैक्रियक
तैजसकार्म्मणशरीरहुंडसंस्थानौदारिकवैक्रियिकांगोपांगसंप्राप्तासृपाटिकासंहननवर्णरसगंधस्पर्शनरकगतिति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

देयेतिघायोग्यानुत्कृष्टागुरुलघूपघातपरघातोच्छ्वासातपोद्योतप्रशस्तविहायोगतित्रसस्थावरबादरपर्याप्तप्रत्येकशरी
रास्थिरशुभनशुभसुभगदुस्वरानादेय अयशः कीर्तिनिर्माणनीचैर्गोत्राणां उत्कृष्टः स्थितिबंधः विंशतिसागरोपमकोटीको
ट्यः नरकदेवायुस्तुत्रयस्त्रिंशत्सागरोपमान्युत्कृष्टा स्थितिः तिर्यग्मनुष्यायुषोरुत्कृष्टा स्थितिस्त्रीणि पल्योपमानि द्वीन्द्रि
यत्रींद्रियचतुरिंद्रियजातिवामनसंस्थानकीलिक संहनन सूक्ष्मापर्याप्तसाधारणनाम्नामुत्कृष्टा स्थितिरष्टादश
सागरोपमकोटीकोट्यः आहारकशरीरांगोपांगतीर्थकरनाम्नामुत्कृष्टा स्थितिः अंतःकोटीकोट्यः न्यग्रोधसंस्थानवज्र
ऋषभनाराचसंहनननाम्नां उत्कृष्टा स्थितिर्द्वादशसागरोपमकोटीकोट्यः स्वातिसंस्थाननाराचसंहननयोरुत्कृष्टा स्थि
तिः चतुर्दशसागरोपम[कोटीको]ट्यः कुब्जसंस्थानार्धनाराचसंहननयोरुत्कृष्टा स्थितिः षोडशसागरोपमकोटीकोट्यः
सर्वत्रयावंत्यः सागरोपमकोटीकोट्यस्तावंति वर्षशतान्यबाधा अबाधककर्मस्थितिकर्म्मनिषेधकः येषां तु अंतः कोटीको
स्थितिस्तेषामंतर्मुहूर्त्तमबाधा आयुषः पूर्वकोटीत्रिभागउत्कृष्टाबाधा अबाधोनाकर्म्मस्थितिः कर्म्मस्थितिः इयंसं ३२३
ज्ञिपंचेंद्रियस्योत्कृष्टा स्थितिरेकेंद्रियस्य पुनर्मिथ्यात्वस्योत्कृष्टः स्थितिबंधः एकसागरोपमं कषायाणांसप्तचत्वारोभागा सागरोपमस्य
ज्ञानावरणदर्शनावरणांतरायसातवेदनीयानामुत्कृष्टः स्थितिबंधः सागरोपमस्यत्रयः सप्ततभागा नोकषायाणांसप्तद्वौ

भागौ नोकषायाणांसागरोपमस्य द्वौसप्तभागौ एवंशेषाणां त्रैराशिकक्रमेणैकेंद्रियस्योत्कृष्टा स्थितिः साध्या त
स्यासंदृष्टिरेषा १ ४ ३ २ एवंद्वीन्द्रियाद्यसंज्ञिपंचेंद्रियापंचेंद्रियपर्यंतानामुत्कृष्टा स्थितिः साध्या द्वीन्द्रि
यस्यमिथ्यात्वस्योत्कृ ७ ७ ७ ष्टा स्थितिः पंचविंशतिसागरोपमानां त्रीन्द्रियस्यपंचाशत्चतुरिंद्रियस्यशतंअ
संज्ञिपंचेंद्रियस्य सहस्रंतद्विभागेनशेषकर्मणामपि उत्कृष्टस्थितिः साध्याः त्रैराशिकक्रमेण तेषां संदृष्टयः
२५ १०० ७५ ५० द्वींद्रियस्यमिथ्यादीनां ५० २०० १५० १०० त्रींद्रियस्यमिथ्यादीनां १०० ४००
७ ७ ७ ३०० २०० चतुरिंद्रियस्यमिथ्यात्वा ७ दीनां ७ १००० ४००० ३००० २००० ७
असंज्ञिपंचेंद्रियस्यमि ७ ७ थ्यात्वादीनामुत्कृष्टः स्थितिबंधः सर्वत्रावल्यासं। ७ ७ ७ स्यात
नागअबाधा इति एषोत्कृष्टस्थितिबंधप्रतिपाद्य जघन्यस्थितिबंधप्रतिपादयन्नाह बारसयवेयणीए णामगो
दायअट्ठयमुहुत्ता भिण्णमुहुत्तं तुठिदी ज हण्णयंसेसपंचण्हं वेदनीयस्यकर्म्मणः जघन्यास्थितिर्द्वादशमुहू
र्त्ता नामगोत्रकर्म्मणोरष्टौ मुहूर्त्ताजघन्यास्थितिः शेषाणांपुनः पंचानांज्ञानावरणदर्शनावरणमोहनीयायुरंतरा
याणांजघन्यास्थितिरंतर्मुहूर्त्तमात्रेति जघन्यस्थिते र्विशेषप्रतिरूपयन्नाह पंचज्ञानावरणचतुर्दर्शनलोभसंज्वलनपं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चांतरायाणां जघन्या स्थितिरंतर्मुहूर्त्तमात्रं तिजघन्यस्थितेर्विशेषप्रतिरूपणत्वात् पंचज्ञानावरणचतुर्दर्शनलोभसंज्वलन नवित...
पंचांतरायाणां जघन्या स्थितिरंतर्मुहूर्त्तमासा सवेद्यस्य द्वादशमुहूर्त्ता नामयशःकीर्त्त्युच्चैर्गोत्रयोरष्टौ मुहूर्त्ताः क्रोधसंज्वलन।
स्य द्वौ मासौ मानसंज्वलनस्यैको मासः मायासंज्वलनस्यार्द्धमासः पुरुषवेदस्याष्टौ संवत्सरा निद्रानिद्राप्रचलाप्रचलास्त्यान
गृद्धिनिद्राप्रचला असातवेदनीयानां सागरोपमस्य त्रयः सप्तभागाः पल्योपमासंख्यातभागहीना मिथ्यात्वस्य सागरोपमस्य
सप्तदशभागाः पल्योपमासंख्यातभागहीना अनंतानुबंध्यप्रत्याख्यानानां सागरोपमस्य चत्वारः सप्तभागाः पल्यो
पमासंख्यातभागहीना अष्टानां नोकषायाणां सागरोपमस्य द्वौ सप्तभागौ पल्योपमासंख्यातभागहीनौ नर
कदेवायुषोर्दशवर्षसहस्राणि तिर्यग्मनुष्यायुषोरंतर्मुहूर्त्तं नरकगतिदेवगति वैक्रियिकशरीरांगोपांग।
नरकगतिप्रायोग्यानुपूर्व्याणां सागरोपमस्य द्वौ सप्तभागौ पल्योपमासंख्यातभागहीनौ आहारांगोपांगतीर्थक
राणां सागरोपमानां कोटीकोट्या अंतःशेषाणां सागरोपमस्य द्वौ सप्तभागौ पल्योपमासंख्यातभागहीनौ सर्व ३२५
त्र जघन्या स्थितिरसिंबंधनीया सर्वत्र चांतर्मुहूर्त्तमाबाधा अबाधाना कर्म्मस्थितिनिषेधकः सर्वोयं जघन्या स्थिति
बंधसामान्यापेक्षसंज्ञिपंचेंद्रियस्य एकेंद्रियद्वींद्रियत्रींद्रियचतुरिंद्रियाणां संज्ञिपंचेंद्रियाणां जघन्य स्थितिबं।

क्षेयएवोत्कृष्टश्चक्तः स एव पल्योपमासंख्यातभागहीनोऽधिकश्च इति अनुभागनिरूपणत्वात् कम्माणंजो उ
रसो अज्झवसाणजणिदसुहअसुहो वा बंधो सो अणुभागो पदेसबंधो इमो होइ कर्म्मणां ज्ञानावरणा
दीनां यस्त्वरसः सोनुभव अध्यवसानैः परिणामैर्जनित अध्यवसानः जनितक्रोधमानमायालोभतीव्रादिपरि
णामः भावितशुभः सुखदः अशुभः असुखदो वा विकल्पार्थः सोऽनुभागबंधः यथा अजागोमहिष्यादीनां
क्षीराणां तीव्रमंदादिभावेन रसविशेषस्तथा कर्म्मपुद्गलानां तीव्रादिभावेन स्वगतसामर्थ्यविशेषः शुभः अ
शुभो वा यः सोनुभागबंधः शुभपरिणामानां प्रकर्षभावात् शुभप्रकृतीनां प्रकृष्टोनुभवः अशुभप्रकृतीनां नि
कृष्टः अशुभपरिणामानां प्रकर्षभावात् अशुभप्रकृतीनां प्रकृष्टोनुभवः शुभप्रकृतीनां निकृष्टः स एवं प्रत्ययव
शादुपपन्नो रसविशेषः द्विधा प्रवर्त्तते स्वमुखेन परमुखेन च सर्वासां मूलप्रकृतीनां स्वमुखेनैवानुभवः उत्तरप्रकृतीनां तुल्य
जातीनां परमुखेनापि आयुर्दर्शनचारित्रमोहवर्जानां न हि नरकायुर्मुखेन तिर्यगायुर्मनुष्यायुर्वा विपच्यते नापि
दर्शनमोहश्चारित्रमोहमुखेन चारित्रमोहो वा दर्शनमोहमुखेनेति तथा देशघाति सर्वघातिभेदेनानुभागो द्विवि
धः देशं घातयतीति देशघाती सर्वं घातयतीति सर्वघाती केवलज्ञानावरणदर्शनावरणनिद्रानिद्राप्रचलाप्रचला

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्त्यानगृद्धिनिद्राप्रचलाचतुःसंज्वलनवर्ज्जद्वादशकषायमिथ्यात्वादीनां विंशतिप्रकृतीनामनुभागः सर्वघाती ज्ञा।
नादिगुणं सर्वं घातयतीति वचनादद्रव्यमतिज्ञानश्रुतज्ञानावधिज्ञानमनःपर्ययज्ञानावरणपंचांतरायसंज्वल
नक्रोधमानमायालोभनवनोकषायाणां उत्कृष्टानुभागबंधः सर्वघाती वा देशघाती वा जघन्यो देशघाती साता
सातचतुरायुःसर्वनामप्रकृत्युच्चनीचैर्गोत्राणां उत्कृष्टाद्यनुभागबंधघातिनां प्रतिभाग देशघाती घाति विनाशे
स्वकार्यकरणसामर्थ्याभावात् एता घातिप्रकृतयः पुण्यपापसंज्ञाः शेषाः पुनः सर्वा अघातिसंज्ञोपायाः न
वंतीति अशुभप्रकृतीनां चत्वारि स्थानानि निंबकांजीरविषकालकूटानीव शुभप्रकृतीनां च चत्वारि स्थानानि गु
डखंडशर्करामृतानीव मोहनीयांतरायवर्ज्जानां पण्णां कर्म्मणां उत्कृष्टानुभागबंधः चतुःस्थानिकः जघन्यानुभा
गबंधो द्विःस्थानिकः शेषाः द्वित्रिचतुःस्थानिकाः मोहांतराययोरुत्कृष्टानुभागबंधः चतुःस्थानिकः जघन्यानु
भागबंधः एकस्थानिकः शेषः एकद्वित्रिचतुःस्थानिकः चतुर्ज्ञानावरणत्रिदर्शनावरणपुंवेदचतुःसंज्वलन। २१७
पंचांतरायाणां सप्तदशप्रकृतीनां उत्कृष्टानुभागबंधः चतुःस्थानिकः जघन्यानुभागबंधः एकस्थानिकः शेषाः
सर्वेपि केवलज्ञानावरणसातासातमिथ्यात्वद्वादशकषायाष्टनोकषायचतुरायुःसर्वनामप्रकृतिउच्चनीचैर्गोत्रा

णां नामप्रकृत्यनुभागबंधः चतुःस्थानिकः जघन्यो द्विस्थानिकः शेषो द्वित्रिचतुःस्थानिको जघन्यो द्विस्थानिकः शेषो
द्वित्रिचतुःस्थानिकघातिनामेकस्थानं नास्ति पुंवेदरहितनोकषायाणां चैकस्थानं नास्ति निंबवदेकस्थानं कां
जीरवद्विस्थानं विषवत्तृतीयस्थानं कालकूटवच्चतुर्थं स्थानं अशुभप्रकृतीनामेतत् गुडवदेकस्थानं खंडवत्
द्विस्थानं शर्करावत्त्रिस्थानं अमृतवच्चतुःस्थानं शुभप्रकृतीनामेवेति पंचशरीरबंधसंघातत्रयांगोपांगषट्संहनन।
पंचवर्णद्विगंधपंचरसाष्टस्पर्शागुरुलघूपघातपरघातातपोद्योतनिर्माणप्रत्येकसाधारणस्थिरास्थिरशुभाशुभा
एताः प्रकृतयः पुद्गलविपाकिकाः पुद्गलपरिणामिन्यायतस्तस्येति चचार्याद्रूपिणां विविपाकात् तत्र धारयात्।
एताः प्रकृतयः पुद्गलविपाकिकाः पुद्गलपरिणामिन्यायतस्तेति चचार्याद्रूपिणां विविपाकात्त्रव धारयात्।
चत्वार्यानुपूर्व्याणि नामानि क्षेत्रविपाकानि क्षेत्रमासृत्य फलदानात् शेषाः प्रकृतयो जीवविपाकाः जीवपरिणाम
निमित्तत्वादिति अनुभागबंधं व्याख्याय प्रदेशबंधं प्रतिपादयन्नाह सुहुमे जोगविसेसे णएगखेत्तोवगाढ
विदियाणं एक्केक्केपएसे कम्मपएसा अणंताउ सुक्ष्मस्सूक्ष्माः न स्थूलाः जोगविसेसेमनोवचनकाय
विशिष्टव्यापारात् एगखेत्तोवगाढ एकक्षेत्रावगाहिकान् न क्षेत्रांतरावगाहिनः यस्मिन्नेवात्मा कर्म्मादानः ततः
परस्मिन् क्षेत्रे ये पुद्गलाः तेषां इति ठिदियाणं स्थितानगच्छतः एक्केक्केपएसे सव्वात्मप्रदेशेषु कम्मपदेसा क

Ganesh Varni Digambar Jain Institute, Narja, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्म्मप्रदेशा ज्ञानावरणादिनिमित्तपरमाणवः अयं तात्पर्य अनंतानंतसूक्ष्मग्रहणग्रहणयोग्यपुद्गलस्कंधा वा पुद्गला
र्थग्रहणयोग्याः पुद्गलाः सूक्ष्माः न स्थूलाः एकक्षेत्रावगाढवचनं क्षेत्रांतरनिवृत्त्यर्थं एकक्षेत्रकर्म्मादानशक्ति
कर्ता विसदृचरितप्रदेशा अवगाढा य एते एकक्षेत्रावगाढाः स्थिता इति क्रियांतरनिवृत्त्यर्थं स्थिता न गच्छंत एके
कप्रदेशवीप्सानिर्देशान सर्वात्मप्रदेशसंग्रहः कृत्वा स्वेनाक्षरनिर्देशः कृतस्तेन एकप्रदेशादिपुनकर्म्मप्रदेशाः प्र
वर्तंत इत्यादि ऊर्ध्वमधस्तिर्यक् सर्वथात्मप्रदेशा पुद्गला व्याप्य स्थिता इति कर्म्मग्रहणं सर्वकर्म्मप्रकृतिसंग्रहार्थं अनेनो
पादानं च संग्रह कृतः प्रदेशा इति पुद्गलग्रहणं तेनाकाशादिप्रदेशनिवृत्तिः अनंतानंत इति परिमाणांतरव्यपो
हार्थं शाद अनुक्तसर्वविशेषसंग्रहार्थं न संख्येया न चासंख्येया नाप्यनंतास्ते पुद्गलस्कंधाः किंत्वभव्यानामनंतगुण
सिद्धानामनंतभागप्रमिता घनांगुलस्यासंख्येयभागावगाहिन एकद्वित्रिचतुःसंख्येयसमयस्थितिकाः पंचवर्णरसद्वि
गंधचतुःस्पर्शलवाः सूक्ष्मा अष्टविधकर्म्मप्रकृतियोग्या एकक्षेत्रावगाहिनः स्थिताः सर्वात्मप्रदेशे योगवशा २३७
दात्मना प्रदेशाः कर्म्मरूपेण आत्मसात्क्रियंते अयं प्रदेशबंधः अथवा आत्मनो योगवशात् अष्टविधकर्म्महेतवो अनं
तानंतप्रदेशा एकैकप्रदेशे ये स्थितास्ते प्रदेशबंध इति अष्टविधकर्म्मयोग्यपुद्गलानां एकैकसमयेन बंधनभाग

तेषां मध्ये आयुर्भागस्तोकः नामगोत्रयोरन्योन्यसमोधिक एकतरो भागः आयुर्भागात् ज्ञानावरणदर्शनावरणां
तरायाणां भागोऽन्योन्यसदृश एकतरो नामगोत्रयोरेकतरभागाधिको मोहस्य भागः आवरणांतरायैकतरभागादधि
को मोहभागाद्वेदनीयभाग अधिकः सर्वत्रावल्यसंख्यातभागेन भागे हृते यल्लब्धं तेनाधिक इति एवं सप्तविधबं
धकानां षड्विधबंधकानां च ज्ञातव्यं ज्ञानावरणादीनामात्मप्रदेशभागा आत्मा तेन तत्प्रकृतयो यावत्स्वावस्थागरति
गच्छंति एवं बंधपदार्थो व्याख्यातः संक्षेपत इतऊर्ध्वं उपशमनविधिं क्षपणविधिं च प्रपंचयन्नाह मोहस्याव
रणानां क्षपणाद् अंतरायस्य च एव उद्भवति केवलं पयासयं सहलावाणं मोहस्यावरणयोरंतरायस्य
च क्षयेण विनाशेन उत्पद्यते केवलं केवलज्ञानं प्रकाशकं सर्वभावानां सर्वद्रव्यपर्यायपरिच्छेदकं अथ शास्त्र
सूत्रप्रमुपशमनविधिं तावत्प्रतिपादयामि अनंतानुबंधिक्रोधमानमायालोभसम्यक्त्वसम्यग्मिथ्यात्वमिथ्यात्वा
नीति एताः सप्तप्रकृतीः असंयतसम्यग्दृष्टिसंयतासंयतप्रमत्ताप्रमत्तादीनां मध्ये कोप्येक उपशमयति तत्राधःप्र
वृत्तपूर्वकरणानि कृत्वा अनिवृत्तिकरणकालस्यासंख्येयेषु भागेषु गतेषु विशेषघातेन हन्यमानमनंतानुबंधिचतु
ष्कस्थितिसत्कर्मोपशमं याति स्वस्वरूपं परित्यज्यान्यस्य प्रकृतिस्वरूपेणावस्थानमनंतानुबंधिना उपशमः पुनरधःप्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पूर्वं अनिवृत्तिकरणं निरूप्य अनिवृत्तिकरणकालस्य संख्येयेषु भागेषु गतेषु दर्शनमोहत्रिकस्योदयावलिबाह्यप्रथ
मः तेषूपशांतानामपि उत्कर्षापकर्षपरप्रकृतिसंक्रमणानामस्थितिर्यत इति अपूर्वकरणेनैकमपि कर्मोप
शाम्यति । किंत्वपूर्वकरणप्रतिसमयमनंतगुणविशुद्ध्या वर्द्धमानः अंतर्मुहूर्तेनैकैकस्थितिखंडकं पातयन् सं
ख्यातसहस्राणि स्थितिखंडकानि पातयति तावन्मात्राणि च स्थितिबंधापसरणानि करोति एकैकस्थितिखंडका
भ्यंतरसंख्यातसहस्राण्यनुभागखंडकानि पातयति प्रतिसमयमसंख्यातगुणप्रदेशनिर्जरां करोति प्रशस्तक
र्माणि न बध्नाति तेषां प्रदेशाग्रं असंख्यातगुणश्रेण्या अन्यासु प्रकृतिषु बध्यमानासु संक्रामयति पुनरपूर्वक
रणमतिक्रम्य अनिवृत्तिकरणं प्रविश्य अंतर्मुहूर्तमात्रमंतरविधानेन स्थित्वा द्वादशानां कषायाणां नवानां नोकषा
याणामंतरमंतर्मुहूर्तेन करोति । अंतरे कृते प्रथमसमयादुपरि अंतर्मुहूर्ते असंख्येयगुणश्रेण्या नपुंसकवेदमुप
शमयति ततोंतर्मुहूर्तं गत्वा नपुंसकवेदोपशमनविधिना स्त्रीवेदमुपशमयति ततोंतर्मुहूर्तेन तेनैव विधिना षण्णोक २२१
षायाणां पुरुषवेदचिरंतनसत्कर्मणा सह युगपदुपशमयति ततः समयोनद्व्यावल्यां गत्वा पुंवेदनवक
बंधमुपशमयति ततः समयोनद्व्यावल्यां गत्वा क्रोधसंज्वलननवकबंधमुपशमयति ततोंतर्मुहूर्तं गत्वा अप्र

त्याख्यानमानौ असंख्यातगुणश्रेण्या मानसंज्वलनं चिरंतनसत्कर्मणा सह युगपदुपशमयति ततः समयोनद्व्या
वल्यां गत्वा मानसंज्वलननवकबंधमुपशमयति ततः प्रतिसमयमसंख्यातगुणश्रेण्या उपशमयन् अंतर्मुहूर्तं गत्वा
द्विप्रकारां मायां मायासंज्वलनं चिरंतनसत्कर्मणा सह युगपदुपशमयति ततो द्व्यावल्यां समयोनां गत्वा माया
संज्वलननवकबंधमुपशमयति ततोंतर्मुहूर्तं गत्वा द्विविधं लोभं लोभसंज्वलनं चिरंतनसत्कर्मणा सह लोभवे
दकाद्धायाः द्वितीयत्रिभागे सूक्ष्मां किट्टिकां मुक्त्वा शेषं बादरलोभस्पर्द्धकगतं सर्वं नवकबंधोच्छिष्टावलिकवर्ज्यं अ
निवृत्तिचरमसमये निवृत्तिमुपशमयति नपुंसकवेदमादिं कृत्वा यावद्बादरसंज्वलनं एतेषामनुवृत्तेरुपशामकत्व
निवृत्तौ तदनंतरसमये सूक्ष्मकिट्टिकास्वरूपं लोभं वेदयन् नष्टानिवृत्तिसंज्ञः सूक्ष्मसांपरायो भवति ततश्चात्मनश्च
रमसमये लोभसंज्वलनं सूक्ष्मकिट्टिकास्वरूपं निःशेषमुपशमयति ततउपशांतकषायवीतरागछद्मस्थो भवति अ
प्यार्द्रात्रोत्कर्षापकर्षपरप्रकृतिसंक्रमस्थित्यनुभागखंडघातैर्विना स्थानमपि समासमेष मोहनीयोपशमविधिरि
तिरूपणविधिर्वक्ष्ये क्षपणं नाम अष्टकर्मणां मूलोत्तरभेदइतिप्रकृतिस्थित्यनुभागप्रदेशानां जीवाद्धोतिरशेषविना
शइति अनंतानुबंधिक्रोधमानमायालोभमिथ्यात्वसम्यग्मिथ्यात्वसम्यक्त्वाख्याः सप्तप्रकृतीः एताः असंयतसम्यग्दृ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ष्टिसंयतासंयतप्रमत्ताप्रमत्तसंयतानां वा क्षपयति किमक्रमेणानंतानुबंधिचतुष्कं त्रीन्कर
णान् कृत्वा अनिवृत्तिकरणचरमसमये अक्रमेण क्षपयति पश्चात्पुनरपि त्रीण्करणानि कृत्वा अधःप्रवृत्तिकर
णापूर्वकरणौ द्वाविति क्रम्यानिवृत्तिकरणकालसंख्येयभागान्गत्वा मिथ्यात्वं क्षपयति ततोंतर्मुहूर्त्तं गत्वा सम्यग्मि
थ्यात्वं क्षपयति ततोंतर्मुहूर्त्तं गत्वा सम्यक्त्वं क्षपयति ततः अधःप्रवृत्तिकरणं कृत्वा अंतर्मुहूर्त्तेनापूर्वकरणो भवति स एक
मपि कर्म न क्षपयति किंतु समयं प्रति असंख्येयगुणरूपेण प्रदेशनिर्ज्जरां करोति अंतर्मुहूर्त्तेनैकैकं स्थितिखं
डकं पातयन् आत्मनः कालाभ्यंतरे संख्यातसहस्राणि स्थितिखंडकानि पातयति तावन्मात्राणि च स्थितिबंधापस
रणानि करोति तेभ्यश्च संख्यातसहस्रगुणान् अनुभागखंडकघातान् अनुभागखंडघातान् करोति यत एकानुभाग
खंडकोत्कीर्णकालात् एकस्य स्थितिखंडकोत्कीर्णकालः संख्यातगुण इति एवंविधं कृत्वा अनिवृत्तिगुणस्थानं प्रवि
श्यानिवृत्तिसंख्यातभागं अपूर्वकरणविधानेन गमयित्वा अनिवृत्तिकालसंख्यातभागशेषे स्त्यानगृद्धित्रयनरका ३३२
ति तिर्यगेकेंद्रियद्वींद्रियत्रींद्रियचतुरिंद्रियजातिनरकगतितिर्यग्गतिप्रायोग्यानुपूर्व्यातपोद्योतस्थावरसूक्ष्मसा
धारणसंज्ञिकाः एताः षोडश प्रकृतीः क्षपयति ततोंतर्मुहूर्त्तं गत्वा प्रत्याख्यानावरणक्रोधमानमायालोभान् क्रमेण क्ष

पयति मध्यमकर्मगतस्यापदेशः कषायाष्टकस्यापदेशः नवरमष्टसु कषायेषु प्रक्षोदन्नस्ति एतौ द्वावप्युपदेशौ
ग्राह्याव सूत्रौ निर्दिष्टाविति ततोंतर्मुहूर्त्तं गत्वा चतुर्णां संज्वलनानां नवानां नोकषायाणां अंतरं करोति सोदयानां
अंतर्मुहूर्त्तमात्रं प्रथमस्थितिं स्थापयति अनुदयानां समयोनावलिकामात्रां प्रथमस्थितिं स्थापयति ततोंतरक
रणं कृत्वा अंतर्मुहूर्त्तेन नपुंसकवेदं क्षपयति ततोंतर्मुहूर्त्तं गत्वा स्त्रीवेदं क्षपयति ततोंतर्मुहूर्त्तं गत्वा षण्णोकषाया
न् पुंवेदचिरंतनसत्कर्मणा सह वेद द्विचरमसमये युगपत् क्षपयति ततश्चावलीमात्रकालं गत्वा पुंवेदं क्षपयति
ततोंतर्मुहूर्त्तेन क्रोधसंज्वलनं क्षपयति ततोंतर्मुहूर्त्तेन मानसंज्वलनं क्षपयति ततोंतर्मुहूर्त्तेन मायासंज्वलनं क्षप
यति ततोंतर्मुहूर्त्तं गत्वा सूक्ष्मसांपरायगुणस्थानं प्रतिपद्यते एतद्वसौ अपि सूक्ष्मसांपरायमात्मनश्चरमसमये किट्टि
कागतं सर्वलोभसंज्वलनं ततः क्षीणकषायो भवति सोप्यंतर्मुहूर्त्तं गमयित्वा आत्मनो द्विचरमसमये निद्राप्रचलासं
ज्ञिके द्वे प्रकृती क्षपयति ततोनंतरं चरमसमये पंचज्ञानावरणचतुर्दर्शनावरणपंचांतरायाख्याश्चतुर्दश प्रकृतीः क्ष
पयति एतेषु त्रिषष्टिकर्मसु क्षीणेषु सयोगिनो भवति केवली तद्द्वारकेण न किंचिदपि कर्म क्षपयति ततः क्रमेण वि
हृत्य योगनिरोधं कृत्वा अयोगिकेवली भवति स यत्कर्म क्षपयति तन्निरूपयन्नाह ॥ तत्रोपांत्ये देहो नामगोदं च

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

केवलीजुगमं आउगवेयणियंचदि खिवइवीणीरउदोदि ततऊर्द्धमयोगकेवलीअदारिकशरीरंसनि:
स्वामोएवायंनामगोत्रकर्मणोआयुर्वेदनीयंचयुगपत्क्षपयित्वानीरजा:सिद्धोलवतिविशेषमाह अयोगि।
केवलीआत्मकालद्विचरमसमये अनुदयवेदनीयदेवगतिपंचशरीरसंघातपंचशरीरबंधनषट्संस्थान अंगो
पांगषट्संहनन पंचवर्णद्विगंधपंचरसा ष्टस्पर्शदेवगतिप्रायोग्यानुपूर्व्यागुरुलघूपघातपरघातोच्छ्वासविहायोग
त्यपर्याप्तप्रत्येकस्थिरास्थिरशुभाशुभदुर्भगदुःस्वरानादेयायशः कीर्त्तिनिर्माननीचैर्गोत्राणिद्वासप्ततिप्रकृ
ती:क्षपयति ततोनंतरसमयेउदयवेदनीयमनुष्यायुर्मनुष्यगतिपंचेंद्रियजातिमनुष्यगतिप्रायोग्यानुपूर्व्यत्रसबादरप
र्याप्तसुभगादेययशः कीर्त्तिमेकास्त्रयोदशप्रकृती:चरमसमयेक्षपयति ततःद्रव्यरूपमादारिकशरीरंत्यक्त्वा
नीरजानिर्मलसिद्धानिर्लेप:सर्वबंधरहितानंतज्ञानदर्शनसुखवीर्यसमन्वितादर्शयायुगपत्सर्वद्रव्यपर्यायावना
सकोनंतगुणाक्षरपरमात्मालवतीति इति:सर्वार्थसिद्धि:सकलगुणनिधिसूक्ष्मलावात्तुरति राचारस्पा। ३३२
तुनीत:परमजिनपत:ख्यातनिर्दोषवृत्त: शुभवाक्य:सुसिद्धाकलिमलमथनीकार्यसिद्धिर्मुनीनां स्थियाज्ञानंद
मार्गेचिरतरमवनावासुनंदीस्वलाव:

ज्ञानमूर्वीरंसर्वज्ञं वागीशंसर्वदर्शिनं मयानिक्षास्पतेरम्यां सुप्रशस्तांप्रशस्तिकां स्वस्तिरवीरुधात्रीसुतबुध
सुरगुरुतार्येवज्ञायातनयविक्रमेदके वादिनवग्रहाहढशाढपंचाख्यासनेऋष्टमहास मातिहार्यपितद्वादशाको
ष्टकेरम्यरमणीयताविराजमानसमवसरणप्रविष्टनिर्ग्रंथकल्पांगनार्यानलोमोसुगव जितालवनलोमनकल्प।
निलिंपमनुजतिर्यक्कुततत्परंपरानंदितशुलजगत्त्रयीनिवासिजनंअष्टादशदोषविनिर्मुक्तंलव्यजनप्रबोधन
दितीर्णानंतस्वकं अतंद्रमुडं श्रीवीरजिनेंद्रं प्रणुत्याभामनलव्यजनलिखापितश्रीमूल:चारग्रंथपुस्तकमपत्र
शस्त्रिंचकारश्रीमलयकीर्त्ति: एकोंगधर्मीयोगीशा लोहाचार्य:श्रियंक्रियात सुष्माकंदानिनाहष्ट्या स्थि:
पादानुसारया श्रीश्रीसिद्धार्थक्षोणीशतनूजस्यकुष्टविष्टनिकृष्टाष्टानि:कर्मनिर्निरस्ताशर्मनिरजस्यस्पमि
हमकृपणमरजस्यानघवतोलगवत:श्रीमहावीरस्यधीरस्यवामचरणकर्निष्टिकापीडनात्नमस्कारंप्रतिपाद्यदाह
ण।श्रीवृगांपात्राणांचमंगलावाप्तयत्निमतकार्यसिद्धय स्वस्वगोत्रहृदयेचत्रिषुकेवलिषुपंचसुचतुर्दशपूर्विषु
एकादशसुदशपूर्विषुपंचसुदशांगधारकषुइंद्रभूतिसुधर्मजंबूविष्णुनंदिमित्रापराजितगोवर्द्धनलद्रबाहुवि।
शाखप्रोष्ठिलक्षत्रियजयनागसिद्धार्थधृतिषेणविजयबुद्धिलगंगदेवधर्मसेननक्षत्रयशःपालपांडुध्रुवसेनकंसा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चार्यसुतन्दयशोनन्दबाहुभवतीते एषु क्रिंगते श्रीवर्द्धमानजिनेश्वरेकांगधरके षुचतुर्थेतन्नगवतो श्रीकुंदाचार्य।
णसमकृतंनगवद्वासनंयतस्ततोम्याशीर्वादमकार्ष   शासनंशाद्धनगृहीतावंकयोवज्रधपिच्छलोहाचार्यलो
हलोहाचार्यलाचार्यादया विनयधरश्रीदत्तशिवदत्तअर्हद्दत्ताश्चत्वारः सर्वांगदेशधराऋषयः तनपरमनहारक
श्रीमायकृततदित्याह   चतुःपयोधिपर्यंता धात्री विदग्तामता लक्ष्मीशानपिनव्यापश्च जगमेसंबोधमुत्तरा
यतिनायनततनास्मि श्रीकंचवटपदक वागगारव्यदक्षिनस्व मंघवागडमंज्ञकं   तस्याच्चयपतीशाना स्वप
र्शकतचित्तजाः अर्हद्बलादयाल्लवन्न श्रुतसागरपारगाः   तषांनामानिवक्ष्मीतः शृणुतऽमद्यान्वय नशोल
दस्वनावश्च धरसेनायतीश्वरः   ततबलिः पुष्पदंतो जिनपालितयोगिराट् सम्मंतलजोधीधर्मा सिद्धिसेनोगण
णीः   देवस्वाम्वजस्वरी महासेनामुनीश्वरः रविषेणगुणाधारः षडंगोगपदज्ञाकः   कुमारेशाः प्रभाचंद्र
कलंकार्यमनोविभुः सिद्धनिःक्रीडितेतप तपःकलावरूंदनं   वीरसेनामितसेना जितसेनोदयार्द्रधीः मुनींद्रा ३२४
रसेनसेनश्च रामसेनायशोधनः   मुनिस्माधवसेनश्च धर्मसेनोजितेंद्रियः जतीद्विजयसेनस्य जयसेनोन्नत।
भूवित   सिद्धांतनीरधेःपारे प्राप्ताद्विद्यासंपतिः सिद्धसेनोगणीशो धृतसद्गुत्तकौशलः   ततोविजय।

५ सेनोपि लाडवागडसंघपः ख्यातःसेनवसेनान्न हामसेनादायापरः   केशवचरित्रसेनौ त्रैलोक्यस्थितिद।
र्शका ततोमहेंद्रसेनोपि विख्यातस्तपसांनिधिः   मुनेजिनंतकीर्तिस्य शिष्योविजयसेनकः जयसेनो
गणाधीशा वादिमुंडालकेसरी   प्रमाणनयनिक्षेप देवानामादिभिःपरः विजितावादिवृंदस्य सेनः के
शवरसेवकः   चरित्रसेनऊशलो मीमांसावनितापतिः वदवदांगतवज्ञो योगीयोगविदांवरः   तस्य
पदृवस्त्रवश्री पद्मसेनोजितांगजः स्मश्रुयुक्तमश्चत्य विरुदंयस्यनामत   तत्पट्टव्योमतारेशः संस्तेधे
मनोशाकृत तपसासूर्यवर्चस्को यमिनांपदमुत्तमं   प्राशःकरोतुमेत त्रिभुवनोत्तरकीर्तिनाक कल्या
णसंपदःसर्वाः सर्वामरनमस्कृताः   श्रीधर्मकीर्तिर्भुवनप्रसिद्ध स्तत्पट्टरत्नाकरचंद्ररोचिः षट्तर्कवेत्ता
गतमानमाय क्रोधाखिलानिवदत्तपुण्यः   तस्यपादपरोजालि र्गुणाकीर्तिविचक्षणः मलयोत्तरकीर्तिना
मुदेक्षयाद्विगंवरः   ह्मकीर्तिर्गुणाश्रेष्ठा ब्रह्मामत्रःक्रुशाग्रधीः धर्मध्यानरतःशांतो दांतःसुव्रतवाग्य।
मी।   ततोऽभूज्जामुनीन्द्रस्य सदत्मोत्तरकीर्तियुक गुर्जरीजगतीशास्त्रो बोयतीमहिमोदयो   वयंत्रया
पिधीमंतः साध्वीयांमोनिरनसः धर्मकीर्तिनगवतः शिष्याऽवरवेःकराः   एतधमानाग्निप्रदग्धकर्मकोता

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गः सेवाधिमानेकक्ष्मापालनिकुरंबकृतसेवावतारः तर्कव्याकरणादिशास्त्रसंदोहैकारागमवाग्नदीसंदोहश्च।
दोश्चलितमिलितसूक्ष्मसीकरसंकलुषितगात्राः अनवरतममतत्त्वविचारकृतस्याद्वादावलोकनाप्तसुखसम्मोद
लक्ष्मीदक्षवनिताकरावलंबनाश्लेषसम्मानितमार्गव्यातिशायितगुणपवित्राः अप्याडंबर्मोपदेशादातारो वीर
वल्लभमृतस्त्रातारः संग्रामाग्रशुक्लानदीदर्पितारिमदामयभृगतिरिक्तविचित्रकायव्यापारगाढगौरवेनकृपसंपन्न
पद्मप्रतापदर्गारिस्मारिविपन्निवारकरटितुरंगमसंग्राममदिपनिरस्ताप्रशस्तयालब्धजनोपरिविदितरूपाससमुदयाः मं
गलयशः श्रयमानप्रथमत्नेयादेववादयः धर्मकीर्तिपताकानिधाः महीपाः अथ च दाक्षिणामध्यासदन।
गरवर्णनानव्याख्यायत अनेकगौडगूर्जरमालवकमाबरठालसमुद्रतिलंगांगवंगकलिंगपंचालमगधौ
द्रविडलाटकर्णाटकजनापदायातनृपवृंदनीतप्रणीतप्रवर्तावतरदक्षिणपश्चिम दिग्भागभुजंगमवादनाद्यनंत
त्रकलसमुद्राकारतोरणारामवर्तितमसमृद्धप्रासादतावलोकनरंजितपारवनितागीयमानसौंदर्यगुणस्तुतिवद्देशा २२५
श्रवविगुणितदर्शनालोचनकलागनागानगर्जनगगन महाराजाधिराजश्रीसुरत्राण श्रीपीरोजसाहिराकरा।
छायाणं दुर्लभस्तनश्रवणनीतरुतातसेवकगण करटिकपोलदिमवल्लिसृतमदजलसुरवादिनीप्रवाहला।

५ दितरथ्यामरवनितानिवहव्योमकपानेकनिष्कउर्ध्वहर्म्यमणिमयजिनप्रासादपंक्तिकोद्घुष्टितवैजयंतीप्रगुण
गगनर्जितान्यदशाजयगामिनीनिकायोल्लसहृदवादवापीकूपतडागोद्यानविश्रमितानिमिषवल्लभासदृस
म्मिलितविचित्रास्तरणात्तर्पितपारसुवर्ती वेजरूतगीतनृत्यवाद्यरवश्रवणाद्याततद्दयितविदित परस्परसंला
पणालापरंजितसर्वदिगायातपांथसार्थ वंदालेकारातिदामतर्कव्याकरणागम ज्योतिषवैद्यकविविधविबुधज
नविवर्ण्यमानसम्यगर्थसार्थ यत्र च दोषाकरत्वं चंद्रमसि नान्येषु चतुर्विधदाननिरतेषु जिनपूजागुरुकृतेषु
आगान्तुषु दोषानिलापोह्यकेषु नान्येषु द्यूतादिसमस्तव्यसनरहितेषु सत्सु अकुलीनता तारागणेषु नान्येषु
सत्परचरणाराधनतत्परेषु मनुजेषु वृत्तभंगः काव्येषु नान्येषु द्वादशव्रतरूपितेषु श्रावकेषु रोधं व्यसनानि।
कृतानां गात्राणां च धारा नकीर्तिपात्रेषु याचकजनेषु दंडो जिनप्रासादवैजयंतीषु नान्यत्रेषु नृपाज्ञाशतिपा
लोकत्रुसीक्षणेषु पटदंडेषु मृदंगेषु च बंधः न शिष्टाचारप्रवर्तकेषु मूलामात्येषु हावभावविलासयुक्तानां स्त्रीरूपाणां के।
पाकलापेषु भंगः न समस्तकरविताडिषु आमंदरोगेषु विरोधः पंजरेषु न कलजातेषु मानवेषु कुटिलत्वयोगश्च
द्विजनसमस्तवक्र विचारतत्परेषु नवेषु लीलाक्षः करग्रहणं समाजेषु नव्यायप्रवर्तकेषु सौंडीरहस्तिश्रिंखलेषु।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ संवत्सरे षोडशशतनामुदयप्रमितिशदिनदशायायनेतस्मिन्नमासवुभक्ष्ये श्रीयोगिनीपुरनिकटनिवासिश्रीपेरोजावा
दसव्यवरेनगरनिवसज्जितैः गर्गगोत्रनलश्रेष्ठ वंशकपद्मोरुयिण्यालिके दानन्यक्षतनामा धीगालक्ष्मास्कवि
सुवत् अथातकाव्यममाक्षः साधुनामयगोर्गुणी तस्यायशोनिश्चय लोकधीमानत्द्भुवि तस्यप्रेमवती
साध्वी पत्नीवीरागरीयसी स्त्रीणगुणारत्नव्याता पालोसीवक्तानकृता: अनयोरनन्तलोगां कर्ऽताःकम
तःसुतो रवेतलोमदनोजाता सारतीतनयाविव पतलदयितानाम्ना सागसंपन्नमन्विता दानशीलगुणाढ्या
वा बन्दवंदाचराद्विणी श्रीगर्गगोत्रीणांच पादपङ्कजानिरवदं कालंगमयतोश्च मनयोःकुलमंडनं
वन्दधुःकमतःफरह पाल्हवीधारव्ययोगजाः शाचाचारविदांमान्या मार्तंडकिरणाइव काकलदीचमा
न्वादी कमनोदरिचंदश्री तयोंताजानयाहृणां विनोतिशृदमधिनां मदननरतीकांता पनीतासर्वसुंदरी
विनातित्रयमारश्रीमान् दरस्तनयानयोः मंदोदरीवधूटीव रावणामास्यन्नुजः जातामंदोदरीजानि र्दे २२६
कंदवडिवांगजः पाल्हसुतामंडननामधेयो जाल्हाद्वितीयोगिरीयात्तृतीयः त्रयोदशश्चैवमशमिदा धर्म
र्थकामाइवनोतिलासः ममाचरितानिपुण्यकार्याणि स्वर्गापवर्गप्रापकानि लक्ष्मीतनयतत्र।
४।

जार्थरिणायनास्युदयचितारकाणि सर्वसुजनमनःपोषकानि घृतगुडदधिशर्करादोडचारूदाक्षाखराजात
४ नकादलत्रपुष्पवायमनारंगजंबीरलकुचबीजपूरकबदरकमंडकमोदकोटनसूपश्यपक्वान्नखज्जकमांडी
मरुकीघवरमाठीमुद्गदालीदधिमनितान्याहारदानानि शुंठीमागधिकालयाजमोदहरिद्राजीरकमरिचवि
जीतकधात्रीफल तितिणीकहनिंबनिंबविडंगपुष्करजटाहृत्तीन्याषधदानानि तर्कव्याकरणछंदोलं
कारादिशास्त्रागमाचारनरतवैद्यकज्योतिषादीनि पुस्तकदानानि एकेंद्रियादिपंचेंद्रियपर्यंतिसत्वजनदुः
खापर्यन्तयदानानि दुकूलक्षौमकोशायक कार्पासिकचीनमहाचीनाद्यानि वस्त्रदानानि चमरचंद्रोपक
कमंडलुकुंडिकादीनियत्युपकरणानि सपत्रश्रृणानिसलवणानि सोपस्काराणि सद्रूपाणि सबहुमानानि
यत्नान्य योग्यमेवमादीनिदानानि बंदेजनयाचकजनेभ्यो मुद्रिकाकंकणकेयूरसुवर्णरूप्यप्रभृतिकं
यच्छन् ततश्रीशत्रुंजयरवतकयात्रोत्सवः साधुमाचारप्रवृत्तयासुशीलयानिरस्तपापोपचारयादेवगुरु
शास्त्रेषु लक्षितत्परयारत्नाकामइवरूक्मिण्या विष्णुरिवनव्यान्पांशोधुरिवशच्याप्रभुरूतइव प्रतयातप
नइवराज्ञिण्याविशकरिव संप्रदायइवचतयापुण्यकाकलेश्री [illegible] सांसवास: श्रीयोगिनी

ni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कुरंनामनगरंसुखेनयातेषुकेषुद्विदिवमेषुमंजातअयोधिपुरा।।था सकलमानमाग्यायाविज्ञसोदयतां साक्ष
फलुन्मर्द्धा निरिति स्वामिविधीयत श्रीश्रुतपंचम्याउद्यापनमितीरितं श्रुत्वासप्रमोदः श्रीधर्मकीर्त्तिमुनि
पायतार्थमितं श्रीमूलाचारपुस्तकं लेखयांचकार पश्चात्तस्मिन्मुनिपतानाकलांकंशास्त्रसंततिनिःक्षायपम
नियमर ।ध्यानाध्ययननिरताय तपोधनश्रीमलयकीर्त्तये तत्प्रकाशमानेमोत्सवंमविनयमर्पयत
६७७ आवेदार्कस्थिरस्थया पुस्तकंभुवनेपरम् यशःपुण्यवतोञ्च गुणिनामिवदर्शनम्

श्रीमूलसंघे नंद्याम्नाये बलात्कारगणे सरस्वतीगच्छे श्री[illegible]दकुंदाचार्यान्वये। भट्टारकश्रीचंद्रकीर्त्तितत्पट्टे
भट्टारकश्रीदेवेंद्रकीर्त्तितत्पट्टे भट्टारकश्रीनरेंद्रकीर्त्तिजी त[illegible]म्नाये पंडितराजश्रीतेजपालस्य: त
स्यवल्लीचोखचंदेण: आत्मपठनार्थं निमित्तं लिखिदापिती।।श्रीसमरपुर:मध्ये।।श्रीरस्तु:।।श्री।।श्री ३३७
संवत् १७३० मिति मार्गसिर सितात्रयोदस्यां।।लिपीकृतं मम मया मुनि श्रीचंद्रकीर्त्तिःस्व:

ग० व० दि० जैन संस्थान नरिया वाराणसी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi